## शेठ नारायणदास आसनमल तथा जेठानंद आसनमलना फंडमांथी तेमना ट्रस्टीओए प्रकट करेला पुष्टिसंप्रदायना ग्रंथो.

१ **बडे शिक्षापत्र**—आ शिक्षापत्रनी किंमत प्रथम त्रण रुपिया हती. ते आ फंड तरफथी बहुज सस्ती किंमते एटले रु. २ मां मळे छे. जे वैष्णवोने जोइए तेमणे तरत मंगावी लेवुं. हवे नवी आवृत्ति छपाशे नहि. केमके बीजा मोटा ग्रंथो छापवा शरु कर्या छे. माटे ज्यां सुधी सिलकमां हशे, त्यां सुधीज मळशे, तेथी जलदी मंगावी लेवुं.

२ **वृत्रासुरचतुःश्लोकी**—श्रीपुरुषोत्तमजीना प्रकाश साथे, व्रजभाषामां किं. आना. ४

३ **निबंधान्तर्गत**—भागवताध्यायार्थः, श्रीगोकुलरायभट्टकृतः, गुजराती भाषांतर साथे, किं. ९ आणकाः ।

४ **निबन्धतृतीयस्कंधटिप्पणी**—श्रीकल्याणरायजीकृता, किंमत ८ आणकाः ।

५ **सहस्रश्लोकीभावना**—गुजराती भाषान्तर तथा विस्तृत उपोद्घात वगेरे साथे, किं. रु. १-८-०

६ **वर्षोत्सवनां कीर्तन**—किंमत रु. ५-१२-०

७ **अणुभाष्यविवरण**—श्रीगिरिधरजीकृत प्रथम अध्याय किंमत रु. ६

८ **वंशावली**—यन्त्रस्था किं. रु. १-४-०

९ **तत्त्वदीपनिबन्ध**—शास्त्रार्थ प्रकरण किं. रु. ४

१० **तत्त्वदीपनिबन्ध**—सर्वनिर्णय प्रकरण किं. रु. ५

११ **सत्सिद्धान्तमार्तण्डः**—किंमत रु. ५

१२ **अथर्वण नारायणोपनिषद**—संस्कृत किं. रु. २

१३ **पुष्टिमार्गोपदेशिका**—भाग २ अप्राप्य

१४ **श्रीमद्वल्लभाचार्यजीनुं जीवनचरित्र**—सिंधीभाषामां किं. रु. ०-१०-०

१५ **ब्रह्मसूत्राणुभाष्यानुवाद**—गुजराती अनुवादक प्रो. गोविंदलाल एच. भट्ट किं. रु. २-८-०

१६ **श्रीकृष्णचरित्र**—लेखक नानुलाल नारायणदास गांधी एम. ए. एल. एल. बी. किं. रु. १

१७ **श्रीमद्ब्रह्मसूत्राणुभाष्य**—द्वितीयाध्याय किं. रु. ५

---

### मळवानां ठेकाणां

१. शेठ नारायणदास अने जेठानंद आसनमल ट्रस्ट ऑफिस, २३६ कालकादेवीरोड, मुंबई नं. २

२. पंडित गट्टूलालजीपाठशाला, कॅथेड्रल स्ट्रीट, भुलेश्वर, मुंबई

३. पंडित नारायण मूलजी बुकसेलर, कालकादेवीरोड, मुंबई

४. शेठ नारायणदास आसनमल, उद्धवकुंड गौशाला, पोष्ट-राधाकुंड, उद्धवकुंड, जिल्हा-मथुरा.

Library IIAS, Shimla
S 181.484 4 V 95 V
00009177

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press, 26-28, Kolbhat Street, Bombay 2
Published by the Trustees of Sheth Narayandas and Sheth Jethanand Asanmal Trust, 236, Kalbadevi Road, Bombay 2

शेठ नारायणदास तथा जेठानन्द आसनमल पुष्टिमार्गीयग्रन्थमाला. रत्न १८.

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

गोस्वामिश्रीमद्रघुनाथात्मजश्रीव्रजनाथविरचिता

# वैयासन्यायमाला

वटपत्तनस्थ-श्रीमन्महाराज-सयाजीरावविश्वविद्यालय-
संस्कृतप्राध्यापकेन हरिगोविन्दात्मज-
गोविन्दलालभट्टेन संशोधितम् ।

तच्च

मुम्बापुरीस्थश्रेष्ठिवर्य-'नारायणदास आसनमल ट्रस्ट'द्रव्यादिव्यवहारा-
वलोकयितृभिः ट्रस्टद्रव्यव्ययेन मुद्रयित्वा प्रकाशितम् ।

मुम्बय्यां निर्णयसागरमुद्रणालये मुद्रितम् ।

सन १९५०, श्रीवल्लभाब्द ४७२.

मूल्यं १२ आणकाः ।

S
1.484 4
95 V

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

# PREFACE

The two small works published here were edited by Mr. Harishankar Omkarji Shastri, who for some reasons best known to himself, did not complete the work by writing an introduction. The Hon. Trustees of the Asanmal Charity Trust requested me to write a short introduction to this volume.

On reading the printed text of the Vaiyāsanyāmālā of S'rī Vrajanātha I found that the text was most inaccurate in many places and that long passages were missing in two cases. As the MS. material was in possession of the old editor who did not comply with the request to return it, the task of correcting the text became difficult. On inquiry I got an old excellent MS. from the collection of the late Prof. M. G. Shastri. The text was carefully compared with the MS. and the additions and corrections were inserted. The MS. is not dated but appears to be about two centuries old. It contains the present text (I. 1-2) and one verse of salutation to Vallabhācārya followed by one Sūtra (I. 3. 1). It appears that the author might have completed the work. A search for more MSS. is necessary for more light on this point.

The second work, Adhikaraṇasaṅgraha, was first published by Mr. Vasantaram Harikrishna Shastri in 1914 A. D. Although this excellent edition was available to the old editor, the text has not been satisfactorily edited. Important corrections have been shown separately. There are two complete and two incomplete MSS. of the Adhikaraṇasaṅgraha, in the MS. library of the Vidyāvibhāga, Kankaroli. One of them is dated V.S. 1831.

The Hon. Trustees of the Asanmal Trust Fund deserve unstinted praise for publishing these two small works which are most useful to the students of Śuddhādvaita Vedānta.

I am thankful to the Manager of the Nirnaya Sagar Press for his unfailing courtesy.

'Śākuntala',
Kharivav, Baroda.
*5-4-1950.*

**G. H. Bhatt.**

CATALOGUED

73

Library IIAS, Shimla
S 181.484 4 V 95 V
00009177

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 9177
Date 26.3.66

S 7/12
181.4844
V95V

॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

गोस्वामिश्रीमद्रघुनाथात्मजश्रीव्रजनाथविरचिता

# वैयासन्यायमाला

॥ श्रीकृष्णवागीशचरणकमलेभ्यो नमः ॥

नुमः श्रीकृष्णवागीशसून्वङ्घ्रिजलजद्वयम् । यद्रसास्वादबलिनः स्वेप्सितं साधयन्ति हि ॥ १ ॥
नुमस्तातं गिरिधरं यत्कृपादृष्टितो वयम् । जाताः श्रीमथुराधीशपादपद्मरसालयाः ॥ २ ॥
नमामि गोपिकाप्राणवल्लभं नन्दबालकम् । शारदेन्दीवरास्यं श्रीकृष्णं सर्वार्थदायिनम् ॥ ३ ॥
श्रीवल्लभं गुरुं नत्वा यत्कृपातोऽणुभाष्यतः । वैयासदर्शनन्यायमाला सङ्ग्रथ्यते मया ॥ ४ ॥
भाष्यस्यातिदुरूहत्वान्मन्दमध्यमयोर्मतिः । नैव प्रविशते तत्र तत्कृते मत्कृतिस्त्वियम् ॥ ५ ॥
न्यायाङ्गपञ्चकं तत्र विषयादिक्रमादहम् । कारिकाभिः प्रवक्ष्यामि सूत्रार्थं च यथामति ॥ ६ ॥
मीमांसायां न्यायशब्दो विषयो विशयस्तथा । वादिपक्षोऽथ सिद्धान्तपक्षः स्यात्सङ्गतिस्तथा ॥ ७ ॥
इत्येवं पञ्चावयवो विद्वद्भिः सम्प्रदर्शितः । पञ्चमाङ्गतया पाठे क्वचिदुक्तं प्रयोजनम् ॥ ८ ॥
तदुपेताधिकरणवचनः शास्त्र ईरितः । न्यायस्यावयवा ये तु चत्वारो विषयादयः ॥ ९ ॥
प्रदर्श्यास्ते प्रतिन्यायमग्रे तेषां निरूपणे । सूचीकटाहन्यायेन शिष्टावयवरूपिणीम् ॥ १० ॥
सङ्गतिं दर्शये पूर्वं शास्त्रव्युत्पत्तिदायिनीम् । शास्त्रेऽध्यायेषु पादेषु न्यायानां विदुषा त्रिधा ॥ ११ ॥
सङ्गतिस्तत्र विज्ञेया शास्त्राध्यायाङ्घ्रिषु स्वतः । शास्त्रादिविषयं ज्ञात्वा ह्यूह्याः सङ्गतयो बुधैः ॥ १२ ॥
शास्त्रं ब्रह्मविचाराख्यं वेदान्तापरनामकम् । अध्यायास्तस्य चत्वारः प्रत्येकं चतुरङ्घ्रयः ॥ १३ ॥
समन्वयाऽविरोधाख्यौ साधनाख्यफलाभिधौ । विस्तरस्य वेदान्तवाक्यैर्ब्रह्मावबोधकैः ॥ १४ ॥
कर्तव्य औपनिषदत्वात्तैरेव न चान्यथा । असन्दिग्धं च सन्दिग्धं तद्वाक्यं द्विविधं मतम् ॥ १५ ॥
असन्दिग्धब्रह्मलिङ्गे वाक्ये नास्ति विचार्यता । सन्दिग्धे शास्त्रतस्तान्येवोदाहृत्य समन्वयः ॥ १६ ॥
ब्रह्मण्येवेति तेषां तु वाक्यानां वेदयुक्तिभिः । व्यासैः प्रदर्श्यते यत्र सोऽध्यायस्यात्समन्वयः ॥ १७ ॥
बलाबलतया युक्त्या बाध्यबाधकभावतः । श्रुतिस्मृत्यविरोधो हि चिन्त्यते यत्र सो मतः ॥ १८ ॥
अध्यायो ह्यविरोधाख्यः सर्वोपनिषदामपि । समन्वयाविरोधाभ्यां ब्रह्मबोधकता हि या ॥ १९ ॥
साधिता सा पुनर्विद्या विषये यत्र चिन्त्यते । ज्ञेयः स साधनाध्यायः फलाध्यायस्तु सो मतः ॥२०॥
यत्र सञ्चिन्त्यते ब्रह्मविदामुत्तरसंस्थितिः । अथोक्ताध्यायपादार्थान्वक्ष्येऽहं क्रमशो मुदे ॥ २१ ॥
विदुषां तत्र पूर्वाध्यायीयाङ्घ्र्यर्थान्ब्रवीमि तत् । सत्कार्यान्तर्याम्युपास्यरूपनिर्णायकानि च ॥ २२ ॥
प्रकीर्णकानीति भेदैश्चातुर्विध्यं भजन्ति हि । वाक्यानां क्रमशस्तेषां ये विचारास्त एव तु ॥ २३ ॥
चतुर्णामपि पादानामर्था ज्ञेया क्रमादथ । द्वितीयाध्यायपादार्थान्वक्ष्ये तत्रादिमः श्रुतौ ॥ २४ ॥
प्राच्य(साङ्ख्य ?)स्मृतिविरोधस्य स्मृत्यन्तरविरोधतः। परिहारः स विज्ञेयो द्वितीयोऽसौ विबुध्यताम् ॥२५॥
सर्वासां कापिलादीनां स्मृतीनां या निराकृतिः । या वैदिकपदार्थानां सृष्टिक्रमविचारणा ॥ २६ ॥
यश्च तेषां स्वरूपस्य विचारस्तावुभौ क्रमात् । सम्यग्वेदार्थचिन्ताया अर्थावग्रिमपादयोः ॥ २७ ॥
ज्ञेयौ ततस्तृतीयाध्यायीयपादार्थसङ्ग्रहम् । वक्ष्ये तत्र पादार्थोऽधिकारिजनुषः पुरा ॥ २८ ॥

ब्रह्माप्तेः साधनस्य यो विचारः स उच्यते । अथ द्वितीयपादार्थं वच्मि तत्राऽधिकारिणः ॥ २९ ॥
प्राप्तौ तद्योग्यदेहस्य जीवे कैवल्ययोग्यता । तस्या निरूपणं यत्र तस्यार्थोऽपि तदेव हि ॥ ३० ॥
पादेऽथ तृतीयेऽनेकशाखासूपास्तये तु ये । अनेके ब्रह्मधर्मा निरूप्यन्ते कर्मभेदवत् ॥ ३१ ॥
भेदबोधकता तेषां नैवास्तीति विचार्यते । ज्ञेयः स एव तस्यार्थस्तुरीयार्थोऽथ कथ्यते ॥ ३२ ॥
यत्किञ्चिद्वेदशाखोक्तस्योपास्ये योपसंहृतिः । शाखान्तरोक्तधर्माणामप्युक्ता यद्वदेव हि ॥ ३३ ॥
परकाण्डं निरूप्य श्रीकृष्णब्रह्मफले तथा । तद्युक्त एव सर्वात्मभाव आद्युक्तकर्मणाम् ॥ ३४ ॥
साधने साधनानां हि कर्तव्या नोपसंहृतिः । एवम्विधविचारो यश्चतुर्थार्थः स गद्यते ॥ ३५ ॥
अथ ब्रुवे फलाध्यायपादार्थास्तत्र जीवतः । मुमूर्षोर्गच्छतश्चापि सफलस्य च साधनैः ॥ ३६ ॥
प्राप्तज्ञानस्याग्रिमाणां व्यवस्थानां क्रमेण ये । सुविचाराः क्रमेणैवं चरणार्था भवन्ति ते ॥ ३७ ॥
सङ्गत्यूहार्थमेवाऽयं शास्त्राद्यर्थः प्रदर्शितः । अतः परं तत्प्रकारः सङ्क्षेपेण प्रदर्श्यते ॥ ३८ ॥
आद्याध्यायीयाद्यपाद आद्याधिकरणस्य हि । अविचार्यविचार्यत्वरूपो वेदान्तवाक्यगः ॥ ३९ ॥
यो विचारः स ब्रह्मैकविचारार्थो यतस्ततः । शास्त्रसङ्गतिरस्याधिकरणस्य तथैव हि ॥ ४० ॥
समन्वयार्थताप्यस्य तयैवाध्यायसङ्गतिः । कार्यवाक्यविचारार्थताऽप्यस्तीत्यस्य सङ्गतिः ॥ ४१ ॥
सिद्धैव पूर्वचरणे ज्ञातव्यैवं हि त्रिष्वपि । द्वितीयस्यापि न्यायस्य सङ्गतिस्तत्र शास्त्रगा ॥ ४२ ॥
साऽस्य हि ब्रह्मणः कार्यलक्षणत्वात्समन्वये । साऽध्यायेऽपि यतो वेत्यादिवाक्यानां समन्वये ॥ ४३ ॥
कार्यनिर्णायकानां हि वाक्यानां हि विचारणात् । पादेऽस्मिन्सङ्गतिर्ज्ञेया न्यायेष्वन्येष्वपि त्रिषु ॥ ४४ ॥
एवमेवोह्यतां शास्त्राद्यर्थाभिज्ञैर्हि सङ्गतिः । वस्तुतः सङ्गतिर्न्यायमात्राङ्गत्वेन नेष्यते ॥ ४५ ॥
किन्तु येऽर्था निरूप्यास्युस्तेषामपि निरूपणे । विज्ञेया सङ्गतिर्ह्यङ्गमन्यथोन्मत्तवाक्यवत् ॥ ४६ ॥
अप्रामाण्यं भवेत्तस्य ततः सैव विविच्यते । शास्त्रसङ्गतिरेकैवाध्यायानां तु द्विधैव सा ॥ ४७ ॥
पादानां तु त्रिधा सा हि चतुर्धा न्यायसङ्गतिः । फलमुद्दिश्य शास्त्रस्य विधानात्फलहेतुता ॥ ४८ ॥
सङ्गतिस्सर्वशास्त्राणां विज्ञेया शास्त्रवेत्तृभिः । इयमेव हि शास्त्रीयानुबन्धानां चतुष्टये ॥ ४९ ॥
शास्त्रप्रस्तावना हेतुसम्बन्धत्वेन सूचिता । अध्यायसङ्गतिः शास्त्रे स्वरूपादिविभेदतः ॥ ५० ॥
विचारात्मत्वतस्तेषामुन्नेतव्या पुनर्मिथः । तेषां पूर्वोत्तरीभावहेतुभूताऽपि सङ्गतिः ॥ ५१ ॥
निरूप्या तत्तदध्यायविषयार्थप्रदर्शने । पादानां सङ्गतिः शास्त्रेऽध्यायेषु च विविच्यते ॥ ५२ ॥
तत्राद्याध्यायपादानां चतुर्णामपि सङ्गतिः । शास्त्रे कार्यादिवाक्यीयविचारात्मत्वतस्तथा ॥ ५३ ॥
द्वितीयाध्यायपादानां शास्त्रसङ्गतिरिष्यते । श्रुतिस्मृत्यविरोधस्य स्मृत्यन्तरविरोधतः ॥ ५४ ॥
परिहारविचारत्वाद्याद्यपादस्य सङ्गतिः । शास्त्रे द्वितीयपादस्य वाक्यब्रह्मसमन्वये ॥ ५५ ॥
प्रमाणत्वस्य संसिद्ध्यै कपिलादिस्मृतेः पुनः । निराकृतिविचारात्मत्वतस्तच्छास्त्रसङ्गतिः ॥ ५६ ॥
सृष्टिक्रमविचारत्वात्तृतीयस्यात्र सङ्गतिः । या वैदिकपदार्थानां स्वरूपस्य विचारणा ॥ ५७ ॥
तदात्मत्वात्तुरीयस्य सम्मता शास्त्रसङ्गतिः । तार्तीयानां हि पादानां प्रदर्श्ये शास्त्रसङ्गतिम् ॥ ५८ ॥
तत्राधिकारिजनुषो ब्रह्माप्त्यै तु विचारणा । तदात्मकत्वादाद्यस्य चरणस्यात्र सङ्गतिः ॥ ५९ ॥
ब्रह्मभावाप्तियोग्यत्वे विषयावधृतिस्ततः । एवं विचारात्मतया पादस्यात्र हि सङ्गतिः ॥ ६० ॥
उपास्तये ब्रह्मधर्मैर्नानाशाखानिरूपितैः ॥ ६१ ॥
अनेकैः कर्मवद्ब्रह्मभेदो नैवास्ति ब्रह्मणि । उपास्तिविषयाः पूर्णा उपास्तेरपि सिद्धये ॥ ६२ ॥
अन्यशाखोक्तधर्माणां योग्यानामुपसंहृतिः । अन्तरङ्गविचारेण बोध्येत्येवं विचार्यते ॥ ६३ ॥

तदात्मकत्वात्पादस्य चतुर्थस्यात्र सङ्गतिः । पादस्य बोध्या विद्वद्भिर्विद्यायाः साधनत्वतः ॥ ६४ ॥
बहिरङ्गविचारेण कर्मणामुपसंहृतिः । एतद्विचाररूपत्वात्तुरीयाध्यायपादगा ॥ ६५ ॥
सङ्गतिश्चिन्त्यते शास्त्रे ब्रह्मवेत्तुः क्रमेण हि । पूर्वोक्तजीवितावस्थाद्यवस्थानां निरूपणात् ॥ ६६ ॥
तत्तत्पादैस्ततस्तेषां संसिद्धा शास्त्रसङ्गतिः । समन्वयाद्यानुकूल्यविचारात्मतया तथा ॥ ६७ ॥
क्रमशः षोडशाङ्गीणां तत्तदध्यायसङ्गतिः । मिथः सङ्गतिमङ्गीणां तत्तत्पादार्थचिन्तने ॥ ६८ ॥
अग्रे निरूपयिष्येऽथ चतुर्द्धा न्यायसङ्गतिः । प्रदर्शयामि तत्राद्यास्त्रयः पूर्वं प्रदर्शिताः ॥ ६९ ॥
चतुर्थी बहुधा रूपा ह्यस्त्यवान्तरसङ्गतिः । आक्षेपिक्यादिभिर्भेदैर्बोध्या तस्यास्त्वनेकता ॥ ७० ॥
पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये । पूर्वपक्षोक्तयुक्तिं च तत्राक्षेपादि योजयेत् ॥ ७१ ॥
वक्ष्येहमपि तां चाग्रे तत्तन्न्यायनिरूपणे । व्युत्पत्तिसिद्धये पूर्वं विचारः सङ्गतेस्ततः ॥ ७२ ॥
नमामि हरिवागीशं स्ववागर्थप्रकाशकम् । स्वभक्तहृदये नूनं तदिष्टकरणे प्रभुम् ॥ ७३ ॥
स्वाचार्यकरुणापाङ्गावलम्वी तद्बलादहम् । अथाधिकरणानां हि विषयाद्यङ्गपञ्चकम् ॥ ७४ ॥
निरूपणं प्रतिज्ञातं दर्शयामि नये स्फुटम् ।

## ॐ अथातो ब्रह्मजिज्ञासा ॥ १-१-१ ॥

अत्राधिकरणे ह्याद्ये वेदान्तानां विचारणा ॥ ७५ ॥
विषयः सा समारभ्या नो वाऽऽरभ्येति संशयः । नारम्भणीया "साङ्गोऽध्येयो ज्ञेयश्चे"ति वाक्यतः॥७६॥
इत्ययं पूर्वपक्षोऽत्र सन्देहविनिवृत्ति तत् । तद्विचारात्मकं शास्त्रं समारभ्यं विधेरिदम् ॥ ७७ ॥
सिद्धान्तसङ्गतिश्चात्र ज्ञेयोपोद्घातरूपिणी । अथेदमस्य शास्त्रस्य ह्यनुबन्धचतुष्टयम् ॥ ७८ ॥
ज्ञेयं ब्रह्मात्र विषयस्तज्ज्ञानं तत्प्रयोजनम् । तद्धेतुता तु सम्बन्धो वेदाधीतौ य एव हि ॥ ७९ ॥
स एवात्राप्यधि ततः फलप्रेप्सुस्तथा न हि ।

एतत्सूत्रार्थस्त्वयम् । अथ शब्दोऽधिकारार्थः । अतः शब्दो हेत्वर्थकः । जिज्ञासाशब्दो विचारार्थकः । तथा च यतः कर्मादिभ्यो ब्रह्मज्ञानमेव परमपुरुषार्थसाधनमतो हेतोर्ब्रह्मविचारोऽधिक्रियत इति सूत्रार्थः ॥

॥ इति जिज्ञासाधिकरणम् ॥ १ ॥

## जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ १-१-२ ॥

अथावसरसङ्गत्याऽऽक्षेपिक्या वा तयाऽत्र तु ॥ ८० ॥
आरभ्यते द्वितीयं तद्ब्रह्म लक्ष्यात्मकं हि तत् । अत्र हि ब्रह्म विषयं यत्क्रियाशक्त्यादिमत्र हि ॥ ८१ ॥
तद्ब्रह्म तत् क्रियाज्ञानशक्तिमद्वेति संशयः । तत्राकर्तृ, ब्रह्मविदाप्नोतीति फलवाक्यतः ॥ ८२ ॥
ऋचैव विवृतात्सर्वधर्मराहित्यनिश्चयात् । परत्वज्ञापनायात्रापरं कर्तृत्वमेव तु ॥ ८३ ॥
आरोप्यानूद्यते पूर्वः पक्षोऽयमयमुत्तरः । उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ॥ ८४ ॥
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् । शास्त्रयोनीति तत्रैव प्रमाणमपि दर्शितम् ॥ ८५ ॥

जन्म आदिर्येषामित्यवयवसमासादतद्गुणसम्विज्ञानो बहुव्रीहिः । जन्म आद्यस्याऽऽकाशस्येति वा ॥ तथा च यतः यस्मात्कारणात् अस्य पूरोवर्तिप्रपञ्चस्य जन्मादि, आद्यस्य जन्म इति वा, तद्ब्रह्मेति लक्षणघटकसाध्यीभूतसूत्रांशार्थः । "तस्माद्वा एतस्मादात्मन" इत्येव विचार्यते फलसम्बन्धित्वात् । शास्त्रे योनिः शास्त्रयोनिः । तस्य भावस्तत्त्वम् । प्रतिपाद्यत्वं सप्तम्यर्थः । शास्त्रोक्तकारणत्वादिति

प्रमाणत्वगर्भितहेतुभूतसूत्रांशार्थः। तथा च शास्त्रप्रमाणशास्त्रप्रतिपाद्यकारणत्वहेतुकसाध्यीभूताऽऽद्यकारणत्वलक्षणकं ब्रह्मेति समुदायार्थः ॥ २ ॥

॥ इति जन्माद्यधिकरणम् ॥ २ ॥

## तत्तु समन्वयात् ॥ १–१–३ ॥

कारणत्वे किं निमित्तं कर्तृ वा समवायि वा । तेष्वेकस्यापि गमकाभावात्तस्यानिवृत्तितः ॥ ८६ ॥
अकारणं कारणं वा तत्राकारणमेव तत् । तन्निर्णायकस्याशक्यत्वाच्छक्यत्वात्समवायि तत् ॥ ८७ ॥
अस्तिभातीत्यादिधर्मैः सर्वत्रैवानुवृत्तितः । उपजीवकता ह्यस्य सङ्गतिस्तन्निरूपणात् ॥ ८८ ॥

तत्समवायिकारणं ब्रह्मैव अकारणत्वपक्षव्यावर्त्तकस्तु शब्दः । तत्र हेतुः, समन्वयादिति । अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् । अवाधितत्वमुपसर्गार्थः ॥ इति सूत्रार्थः ॥ ३ ॥

॥ इति समन्वयाधिकरणम् ॥ ३ ॥

## ईक्षतेर्नाशब्दम् ॥ १–१–४ ॥

एवं त्रिसूत्र्या विश्वस्य यत्कर्तृ समवाय्यपि । तद्ब्रह्म तस्य सम्बन्धिविचारे कार्यता श्रुतेः ॥ ८९ ॥
सिद्धान्तसूत्रद्वये पूर्वशेषत्वाद्ब्रह्मज्ञानदे । स्वरूतः साधनतः फलतश्च निरासतः ॥ ९० ॥
मतान्तराणां सर्वेषां स विचारश्चतुर्विधः । श्रुतितस्त एवास्मिँस्तथाऽध्यायचतुष्टयी ॥ ९१ ॥
तत्राद्याध्यायाद्यपादे सच्चिदानन्दरूपकैः । सहितानि नभोवायुतेजसां वाचकानि हि ॥ ९२ ॥
षड्विधान्येऽपि वाक्यानि निर्णीयन्तेऽत्र लक्ष्मतः ॥ ९३ ॥
विचार उक्ता सद्रूपवाक्यानां ब्रह्मकर्तृता । ज्ञानप्रधानचिद्रूपवाक्यार्थस्य विनिर्णये ॥ ९४ ॥
ततोऽवसरसङ्गत्याऽऽरभ्यते सासूत्रकः । न्याय ईक्षति सञ्ज्ञोऽस्य चेदमङ्गं चतुष्टयम् ॥ ९५ ॥
विचारविषयीकर्तुं शक्यते ब्रह्म नाथ किम् । शक्यते वास्तु तत्राद्यो यतो वाच इति श्रुतेः ॥ ९६ ॥
विरोधादिति चेन्नैवमीक्षते श्रुतिगोचरः ।

सूत्रार्थस्तु, न विद्यते शब्दः प्रतिपादकतयेत्यशब्दम्, सर्ववेदान्ताप्रतिपाद्यं ब्रह्म नाञ्चः । ईक्षतेः । "तदैक्षत", "स ईक्षाञ्चक्रे", "स एकाकी न रमते", स द्वितीयमैच्छत्", "अहं बहु स्यामि"त्यादिवाक्येषु ब्रह्मण इक्षोक्तेः । अयम्भावः । प्रमाणातीतोऽपि स्वेच्छया प्रमाणविषय इति ॥ अन्यथा इच्छावैयर्थ्यं रमणानुत्पत्तिश्च स्यातामिति ॥ ४ ॥

ननु ईक्षति गुक्तः स गौण एवास्तीति अत आहुः—

## गौणश्चेन्नात्मशब्दात् ॥ १–१–५ ॥

ईक्षतिस्तत्कर्ता गौणः प्रकृतिगुणविशिष्ट एव स्यात् । तन्न । आत्मशब्दात् । तदैक्षतेत्यस्योपक्रमे "आत्मा वा इदमेक एवाग्र आसीदि"त्यात्मपदश्रवणात् । तथा चैकैवादिपदैः केवलस्य प्रकृतिगुणरहितस्यैवात्मन ईक्षोक्तेर्न गौण इत्याशयः ॥ ५ ॥

ननु आत्मशब्दो न निर्णायकः । यज्ञदत्तो ममात्मेत्यादिवद्गौणेऽपि तत्प्रयोगादित्याशङ्क्याहुः—

## तन्निष्ठस्य मोक्षोपदेशात् ॥ १–१–६ ॥

तस्मिञ्जगत्कर्तरि निष्ठा यस्य तस्य श्रुत्या मोक्षोक्तेरित्यर्थः। श्रुतिस्तु "यदा ह्येवैष एतस्मिन्न दृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवती"ति । गौणत्वे तु मोक्षो नोपपद्येतेति तात्पर्यम् ॥ ६ ॥

अत्रैव हेत्वन्तरम्—

## हेयत्वावचनाच्च ॥ १–१–७ ॥

साधनोपदेशेषु जगत्कर्तुर्हेयत्वस्यानुपदेशात् । तथात्वे तथात्वमुपदिश्येति भावः । ईक्षतिहेतुसाधकसमुच्चायकश्चः ॥ ७ ॥

एवं चतुःसूत्र्या ईक्षतिहेतुना सृष्टिवाक्यानां भगवत्परत्वमुपपाद्य स्वाप्ययादित्यादित्रिसूत्र्या ब्रह्मणो व्यवहार्यत्वे स्वतन्त्रतया हेतून् वदन्तः पूर्वं प्रलयवाक्यानां ब्रह्मपरत्वमाहुः—

## स्वाप्ययात् ॥ १–१–८ ॥

एवं हि श्रूयते "यत्रैतत्पुरुषः स्वपिति नाम सता सौम्य तदा सम्पन्नो भवति तस्मादेनं स्वपितीत्याचक्षते स्वह्यपीतो भवति" । तथाच स्वस्मिन्सति अप्ययो लयस्तस्मान्नाव्यवहार्यं ब्रह्मेति सूत्रार्थः ॥ स च चित्प्रकरणत्वाज्जीवस्यैवोच्यते ॥ ८ ॥

ननु सुषुप्तिनिरूपणमप्रतिज्ञातत्वादसङ्गतम् । न । मोक्षातिरिक्तदशायां तथाकर्मसम्बन्धाभावात् ॥ एवं मुक्तिवाक्यानामपि तदाहुः—

## गतिसामान्यात् ॥ १–१–९ ॥

गतौ सामान्यात् । गतिर्मोक्षः समानस्य भावः सामान्यम् । मोक्षे सर्वस्यापि भगवता तुल्यत्वात् । इदं च "सर्वासामपां समुद्र एकायनमि"ति श्रुतौ स्फुटम् । अतस्तत्प्रतिपादकवाक्यानां ब्रह्मपरत्वमेवेति सिद्धम् ॥ ९ ॥

किञ्च, सर्वस्यैव कारणकार्यजातश्रुत्यैव ब्रह्मत्वप्रतिपादनात्तत्प्रतिपादकसर्ववेदान्तानां ब्रह्मपरत्वान्नाव्यवहार्यं ब्रह्मेत्याहुः—

## श्रुतत्वाच्च ॥ १–१–१० ॥

श्रुतौ सर्वस्य ब्रह्मतायाः श्रुतत्वात् । "पूर्णमदः पूर्णमिदं", "सर्वे वेदा" इत्यादिश्रुतयोऽनुसन्धेयाः ॥ १० ॥

॥ इतीक्षत्यधिकरणम् ॥ ४ ॥

नमामि परमानन्दमानन्दमपि चिन्तने ॥ ९७ ॥
यतस्तिरोहितानन्दः सानन्दस्तत्कृपादृशा । चिद्रूपस्य हरेरेवं कारणत्वनिरूपणात् ॥ ९८ ॥
तद्वाक्यानां च संसिद्धिर्ब्रह्मैकपरता स्वतः । तस्यानन्दैकरूपस्य कारणत्वाद्विचारणात् ॥
तद्वाक्यानां परब्रह्मपरत्वमुपपद्यते ॥ ९९ ॥
आनन्दमयनाम्नाऽधिकरणेन तु सम्प्रति । यदाश्रयासमारब्धं वेदन्ताभ्यवगाहनम् ॥ १०० ॥
तं नमामि परानन्दं स्वाचार्यचरणाम्बुजम् । अन्यथा तैत्तिरीयानां भृगुब्रह्मकप्रपाठके ॥ १०१ ॥
अब्रह्मपर एवैते स्यातां तस्य निवृत्तये । अयं न्यायः समारभ्यः सङ्ख्याऽघसराख्यया ॥ १०२ ॥

## आनन्दमयोऽभ्यासात् ॥ १–१–११ ॥

आनन्दोऽष्टविधस्तत्र ततः सूत्रार्थको ह्ययम् । तत्रानन्दमयशब्दो ब्रह्म नाभिदधाति किम् ॥ १०३ ॥
अथाभिधत्ते तत्राद्योऽब्रह्मान्नमयतालपतः । आनन्दमयशब्दाभिधेयं नैव भवेद्बृहत् ॥ १०४ ॥
आनन्दमयशब्देन वाच्यं ब्रह्मास्ति नेतरत् । पूर्वप्रवाहभेदस्य साधकाभ्यासतः स्फुटम् ॥ १०५ ॥
नमो भगवते कृष्णवागीशाचार्यसूनवे । गोस्वामिविट्ठलेशनाम्न इष्टार्थदायिने ॥ १०६ ॥
"यदेकाकी न रमते स द्वितीयमैच्छदि"ति । "अहं बहु स्यां", "स हैतावानासे"त्यादिवाक्यतः ॥
"साधनं च फलं चैव कर्ता कारयिताऽपि च ॥ १०८ ॥

"दाता दापयिता भोक्ते"त्यादिरूपेण हि स्वयम् । प्रादुर्भूय परं ब्रह्म जगति क्रीडति प्रभुः ॥ १०९ ॥
काण्डद्वयेऽप्येतदेव प्रमेयं प्रतिपाद्यते । साङ्गसाधनस्वेष्टादिफलकर्त्रादिरूपशः ॥ ११० ॥
रिरंसुनो ब्रह्मणो हि क्रीडाया एव वर्णनात् । अन्यथा जीवपरता तत्साधनफलोक्तितः ॥ १११ ॥
स्याच्छ्रुतेर्जीवपरता किञ्चस्याद्ब्रह्म कर्मणोः । अपि वै जीवशेषत्वं जीवार्थत्वनिरूपणात् ॥ ११२ ॥
सर्वासां तु श्रुतीनां हि स्याद्ब्रह्मपरता तदा । प्रतिपाद्यस्य सर्वस्य यदिस्याद्ब्रह्मता श्रुतेः ॥ ११३ ॥
शाक्यार्थेनैव निर्वाहे नैव लाक्षणिको मतः । तथा च पूर्वकाण्डे तु गौणान्युक्तफलानि हि ॥ ११४ ॥
निरवध्यानन्दरूपं परमं फलमुत्तरे । तैत्तिरीयोपनिषदि ससाधनतया फलम् ॥ ११५ ॥
जगौ ब्रह्मविदाप्नोति" पूर्वं सामान्यतस्ततः । विशेषतो वक्तुकामा स्वोक्तवाक्यार्थबोधकम् ॥ ११६ ॥
सत्यं ज्ञानेत्यादिवाक्यमन्यर्गुक्तं जगौ हि सा । यद्वा, तदेषा भ्युकेति वाक्येनोक्तस्य ब्रह्मणः ॥११७॥
निरूपिकोत्तरर्गेपेत्यर्थोऽयं बुध्यतां बुधैः । तया पूर्वं सत्यमित्यादिनोक्तं ब्रह्म लक्षणम् ॥ ११८ ॥
साधनेन वित्पदार्थेन "यो वेदे"त्यादिना तथा । ततः फलं परप्राप्तिरूपं यत्तन्निरूपितम् ॥ ११९ ॥
"सोऽश्नुते" इति वाक्येन ब्रह्मणे"त्यादिना ततः । वर्णितः परशब्दार्थस्तस्य सर्वान्तरत्वतः ॥ १२० ॥
परत्वबोधनायैव सम्पूर्णोऽयं प्रपाठकः । "तस्माद्वे"त्यादिभिर्वाक्यैराकाशाद्याधिभौतिकम् ॥ १२१ ॥
ब्रह्मणो हि ह्युक्ता यत आध्यात्मिकं हि तत् । "स वा येषे"त्यादिवाक्यैः पक्षिरूपं जगौ श्रुतिः ॥१२२॥
निरूप्य त्रिविधं चाग्रे रूपमाध्यात्मिकं परम् । सर्वस्य सर्वरूपं हि सर्वस्याप्याधिदैविकम् ॥ १२३ ॥
आनन्दमयरूपं हि परात्परतयोच्यते । ततोऽधिकरणे त्वित्थं संयोज्यं ह्यङ्गपञ्चकैः ॥ १२४ ॥
सर्वान्तरोक्त आनन्दमयः किमपरः परः । किं वा तत्राद्य एव स्यात्तस्मिन्नप्यात्मबोधनात् ॥ १२५ ॥
तन्न, सर्वात्मता सर्वान्तरस्यैवोपपद्यते । अतो ह्येष एवेति तदभ्यासात्परो हि सः ॥ १२६ ॥

सूत्राष्टकाष्टकार्थस्त्वेवं ज्ञेयः। आनन्दमयः परमात्मैव पदार्थान्तरभूतेभ्योऽन्नमयादिभ्यो भिन्नः, कुतः अभ्यासात् । अभ्यस्यते पुनः पुनः कीर्त्यते इत्याभ्यासः । स चार्थादानन्दमयस्यैव । तथा चानन्दमयस्याभ्यासादानन्दमयस्तेभ्यो भिन्न इत्यर्थः । नन्वभ्यासो ह्यभ्यस्यमानेस्वविषय एव भेदं साधयति, नत्वनभ्यस्यमाने होमादिवदिति चेत्, अत्रोच्यते, न ह्यत्र तेभ्यो भेदं साधयति सूत्रकारः । शब्दान्तरेणैव तत्सिद्धेः । किन्तु वैलक्षण्यम् । अथ को भेदो किञ्च वैलक्षण्यम्? उच्यते, भेदोऽन्योऽन्याभावः; वैलक्षण्यं विरुद्धो धर्मः। यथा कार्यकारणयोः कारणत्वादि। तस्य चाभेदेऽप्युपपत्तेः । एवं सति अन्नमयादीनां ब्रह्मत्वात्तेभ्य आनन्दमयस्य स सर्वान्तरत्वादिधर्मैः सिद्धमेव वैलक्षण्यमभ्यासेन बोधयतीत्यदोषः । अभ्यासस्य तात्पर्यनिर्णायकत्वात् । अन्यथोक्तसर्वान्तरत्वं न वदेच्छ्रुतिः । यतः सर्वान्तरत्वमवदत्ततस्तदन्तरत्वेन तत्परत्वं साधयन्ती तद्वैलक्षण्येन फलत्वमपि साधितवतीति हृदयम् ॥ तथा चाकाशादिविज्ञानमयान्तान् यो ब्रह्मत्वेन वेत्ति स ब्रह्मवित् । योग्याधिकारो विशेषानुग्रहेणोक्तधर्मैस्तेभ्यः परमानन्दमयपुरुषात् । परमित्याप्नोतेः कर्मतया ज्ञेयब्रह्मणः सकाशादेव परस्याधिदैविकस्योपक्रम एवोद्देशाच्च । सत्यमित्यादिना च तन्निरूपणोपक्रमाच्च । किञ्च, तथात्वे भृगुवल्लीविरोधोऽपि । तथा हि–तत्र हि भृगुर्ब्रह्मजिज्ञासायां तपसा ब्रह्मेति पितुर्वरुणात्तपःकरणोपदेशमधिगम्य तपसैव तज्ज्ञानाधिकारसम्पत्त्याऽन्नं ब्रह्म प्राणो ब्रह्मेति क्रमेणाधिकारातिशयेऽन्नमयादीनि चत्वार्यपि ब्रह्मत्वेन विज्ञायापि पुनर्जिज्ञासायां तथैवोपदेशेऽत्युग्रतपसा मुख्याधिकारे आनन्दमयो ब्रह्मेति सर्वपरत्वेनानन्दं परं ब्रह्मेति ज्ञातवानित्यानन्दस्यैव परत्वेन पुरुषोत्तमत्वेन निरूपणात् ॥ ११ ॥

## विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १–१–१२ ॥

नन्वानन्दो ब्रह्मैव न त्वानन्दमयः । विकारार्थप्रत्ययान्तपदशक्यत्वात्, न; तयोरभेदात् । अन्यच्च

य एव तत्प्रत्ययान्तपदैर्निर्दिष्टा अन्नमयादय आनन्दवल्ल्यां त एतद्विधानात्। छन्दसि ह्यज्व्यतिरिक्तस्थले मयडविधानाच्च। अत्र विशेषस्तु भाष्यादौ विस्तृत इति ततोऽवगन्तव्यः॥ १२॥

एवं शब्दविचारेण विकारार्थत्वं निराकृत्यार्थविचारेणापि मयटो विकारार्थतां निराकरोति—

## तद्धेतुव्यपदेशाच्च॥ १–१–१३॥

हेतुत्वेन व्यपदेशो हेतुव्यपदेशः, तस्य हेतुव्यपदेशस्तद्धेतुव्यपदेशस्तस्मात्। व्यपदेशस्तु "एष ह्येवानन्दयाती"ति सर्वं हि विकारमात्रमेष एव पर आनन्दमय एव आनन्दयुक्तं करोतीत्यर्थः। चकारस्तु तत्रैव हेतत्वसमुच्चायकः॥ १३॥

नन्वन्नमयाद्युपासनापरत्वेनापि हेतुश्रुत्योपपत्तेर्मुख्योपपत्यभावाच्च नानन्दमयपदस्य ब्रह्मपरत्वमिति प्राप्तेऽभिधीयते—

## मान्त्रवर्णिकमेव च गम्यते॥ १–१–१४॥

मन्त्रवर्णेन मुख्यवृत्त्या प्रतिपाद्यं मान्त्रवर्णिकं तस्य परब्रह्मत्वम्। मन्त्रवर्णश्च "सत्यं ज्ञानमि"त्यादि- "ब्रह्मणा विपश्चिते"त्यन्तः। अत्र विपश्चिद्ब्रह्मणः फलत्वेन परपदार्थत्वं नोपपाद्यते। पदादिभेदेन सन्दिग्धत्वादिति चेन्मैवम्। एतदग्रे सर्वस्यैव तदुपपादनार्थत्वात्। अथान्यथा प्रतिज्ञापदार्थचतुष्टय- निरूपणेनैवाकाङ्क्षोपशमादग्रे किमपि न वदेत्। उपपादनं तु हि सन्देहनिराकरणार्थं स चाप्नोतिकर्म- तयोक्तपरपदार्थस्य विवरणं ब्रह्म विपश्चितेत्यतः ब्रह्मविपश्चिच्छब्दाभ्यां ततम्। तत्रैकपदस्य कथं द्वाभ्यां विवृत्तिः कथं वा कुतश्चास्य परत्वम्, पूर्वद्वितीयया परस्य फलत्वे बोधितेऽपि विवरणे सहार्थतृतीयया गौणत्वबोधनात्कथं चास्य फलमित्याकारकः, तन्निराकरणरूपोऽग्रिमग्रन्थः। अत्राय- मभिसन्धिः। परस्य हि फलत्वं पूर्वमेवोपक्रमे ब्रह्मविदित्यादिनैवोक्तम्। तच्च सर्वेभ्यो ब्रह्मानन्दान्तेभ्यः प्राचुर्येण स्तुतानन्दस्यैव तस्यैव प्राप्यत्वात्। पूर्वयोर्विद्यमात्वात्। तस्य स्तुतत्वं त्वभ्यासात्। स च "को ह्येवान्याद्यदेष आकाश" इति श्रुतिद्वये आनन्दाभ्यासः। तस्यैवानन्दस्यान्नमयादिचतुष्टयान्तरत्वात्त- दुत्कृष्टत्वाच्चास्य परत्वम्। ततश्च सर्वात्मत्वं ततश्चास्य ब्रह्मत्वम्। तथा च सर्वत्र प्रपाठके मन्त्रवर्णप्रति- पाद्यं मान्त्रवर्णिकमेव विपश्चिद्ब्रह्मैव सोपपत्तिकं प्रतीयत इति मुख्योपपत्तेर्विद्यमानत्वादानन्दमयः पर- मात्मैवेति सूत्राशयः। अत्र विशेषानुपपत्तिपरिहारस्तु भाष्येऽस्मदाचार्यचरणैः कृत एवेति ततोऽव- गन्तव्यः। चकारस्तु विधिमुखविचारेणाधिकरणसमाप्तिं ज्ञापयति।

अतः परं साधितार्थस्यैव दाताद्यातार्थ(?)मुपोद्घातसङ्गत्या निषेधमुखेन चतुःसूत्रादमेवाधिकरणं पुनर्विचार्यते वर्णकान्तररीत्या॥

स एव विषयोऽत्रापि स किं जीवोऽथ किं बृहत्॥ १२७॥
तत्राद्यो ब्रह्मविज्जीव आनन्दमय एव हि। भवत्येव फलस्यापि पुरुषार्थत्वतो यथा॥ १२८॥
फलं स्वर्गादिसौख्यं हि तथास्य स्यादलौकिकम्। आनन्दमयरूपं हि फलभूतमिति स्थितम्॥ १२९॥
नैतद्युक्तं यतस्तत्र ह्युपपत्तेरभावतः॥ १४॥

कारिकोक्तामेवाशङ्कां परिहरन्त आहुः—

## नेतरोऽनुपपत्तेः॥ १–१–१५॥

इतरो जीवः न आनन्दमयो नेत्यर्थः। जीवस्य फलरूपत्वेनाप्यानन्दमयत्वं नोपपद्यते। तथा सति तस्यानन्दमयस्य स्वातन्त्र्येण जगत्कर्तृत्वेऽत्यलौकिकमाहात्म्यवत्त्वेन निरूपणं नोपपद्येत। अतो न जीव आनन्दमयः॥ १५॥

## भेदव्यपदेशाच्च ॥ १–१–१६ ॥

यतो भेदेन व्यपदिश्यते । "रसꣳह्येवायं लब्ध्वाऽऽनन्दीभवती"त्यादिव्यपदेशात् । ननु तर्हि जड एवास्त्वानन्दमयः । न कारणतया आनन्दमयस्यान्तरत्वात् । जडस्य कार्यतया बाह्यत्वात् ॥ १६ ॥

ननु जडाया अपि प्रकृतेः कारणत्वं साङ्ख्ये सिद्धमेवेत्यत आहुः—

## कामाच्च नानुमानापेक्षा ॥ १–१–१७ ॥

जडायाः प्रकृतेः कारणता तु ईक्षत्यधिकरणे निराकृतैवेति नात्र निराक्रियते । अथानन्दमयस्य ब्रह्मत्वे ब्रह्मण उपसङ्क्रामणीयत्वाभावा"देतमानन्दमयमात्मानमुपसङ्क्रामती"ति वाक्यान्यथाऽनुपपत्त्या-नन्दमयस्यानन्दयातीत्यानन्दजनकत्वोक्तया च चन्दनादिदृष्टान्तबलेन ज्ञानजनकसत्त्वपरिणामभूता ज्ञान-फलरूपा जडा प्रकृतिरानुमानिकी कल्प्यते । अनुमानं तु आनन्दमयपदार्थो जडः आनन्दजनकत्वा-च्चन्दनादिवदित्यानन्दमयो जड इति कल्पना नोपपद्यते । कुतः? अनुमानापेक्षाया अभावात् । स एव कथमिति चेत्, कामात्; "सोकामयते"ति श्रवणात् । कामस्य चेतनधर्मत्वादानन्दमयश्चेतन एव । "स तपो तप्यते"ति चेतनधर्मं तपः सङ्कृह्णाति । शब्दस्वार्थमवबोधयद्वाक्यं नानुमानमाश्रयत इति तात्प-र्यम् ॥ १७ ॥

## अस्मिन्नस्य च तद्योगं शास्ति ॥ १–१–१८ ॥

इतोऽपि न जड आनन्दमयः यतोऽस्मिन्नानन्दमयेऽस्य जीवस्य आनन्दमुपसङ्क्रामतीति तेन रूपेण योगं शास्ति फलत्वेन कथयति । न हि जीवस्य जडापत्तिर्युक्ता । "ब्रह्मैव सन् ब्रह्माप्येती"ति वद-स्याप्यर्थः । तस्मान्नानन्दमयो जडो नापि जीवः । पारिशेष्याद्ब्रह्मैति सिद्धम् । अत्रोक्तप्रकारातिरिक्त-प्रकाराधिकरणरचनायां या अनुपपत्तयस्ता अणुभाष्यादेवावगन्तव्याः । विस्तरभयान्नेह प्रदर्शिता इति सर्वं सुस्थम् ॥ १८ ॥

॥ इत्यानन्दमयाधिकरणम् ॥ ५ ॥

## अन्तस्तद्धर्मोपदेशात् ॥ १–१–१९ ॥

अथ"य एषोऽन्तरादित्य"इत्यस्य विषयो मतः ॥ १३० ॥
आधिदैवतमालम्ब्य तथाध्यात्माऽवलम्ब्यपि । "य एषोन्तरक्षिणी"ति परोऽपि विषयो मतः ॥ १३१ ॥
किमधिष्ठातृदेवस्य विग्रहो चापरं बृहत् । बृहतो वा शरीरं किं तदर्थं संशयान्तरम् ॥ १३२ ॥
वाक्ये हिरण्मयपदं हिरण्यविकृतिं हि किम् । वक्ति किं वा प्रभा सामो (?) नानन्दं वक्ति तत्र हि ॥१३३॥
हिरण्मयपदं ब्रूते हिरण्यविकृतिं स्फुटम् । केशश्मश्रुनखादीनाममेध्यानां निरूपणात् ॥ १३४ ॥
यावच्छरीरधर्माणां सूर्यमण्डलमध्यगः । ईदृक्च्छरीरयुक्ताधिकारी जीवो ह्यतो यतः ॥ १३५ ॥
अथापहतपाप्मत्वादिकधर्मश्रुतेस्तया । पूर्वोक्तदेहधर्माणां श्रवणाद्ब्रह्मविग्रहः ॥ १३६ ॥
अथापि दिव्यादिब्रह्मधर्माणां श्रवणात्परः । आत्मैवात्रापि निर्दिष्टो ह्यसाधारणधर्मतः ॥ १३७ ॥
कार्यासाधारणा धर्मा कारणस्य न कार्यगाः ॥ १३८ ॥
ब्रह्मासाधारणा धर्मा ब्रह्मैव गमयन्ति हि । अतोऽसाधारणो धर्मो यत्र कोऽप्यस्ति सोऽखिलान् ॥ १३९ ॥
बलिष्ठत्वाच्छिष्टसन्दिग्धधर्मेषु ब्रह्मधर्मताम् । बोधयत्येव तुल्यत्वं नाममात्रेण तेषु यत् ॥ १४० ॥
तत्र दोषाय श्रुत्ये(?)वदाते(?)प्यानन्दैकरूपता । बोध्यते ब्रह्मधर्मेषु न जैवेषु विकारतः ॥ १४१ ॥
तस्मात्स्वरूपतो भिन्ना मन्तव्या उभयत्र हि । ब्रह्मणोऽनन्तमूर्त्तित्वाद्ब्रह्मैवाक्षिण श्रुतेर्बलात् ॥ १४२ ॥
गतं न प्रतिबिम्बोत्र मन्तव्यः श्रुतिवाक्यतः । ततः सूर्याक्षिमध्यस्थमशरीरं हि सा कृतिः ॥ १४३ ॥

श्रुत्या निगद्यते ब्रह्म न शरीरं हि तस्य तत्। सर्वसामर्थ्ययुक्तस्य नाकाङ्क्षा देहगोचरा ॥ १४४ ॥
जीवस्य हि तदाकाङ्क्षा नास्ति कुत्रापि ब्रह्मणः। वेदेनैकेन गम्यत्वं श्रौतोपनिषदत्वतः ॥ १४५ ॥
सिद्धो हिरण्मय इति शब्दोऽकारस्य लोपतः। छन्दसि ह्यद्व्यं नात्रातो मयड्विकृतौ न हि ॥ १४६ ॥
अतो हिरण्यशब्दोऽयं तथानन्दस्य वाचकः। तस्यानन्दैकरूपत्वात्तादृगेव ततो बृहत् ॥ १४७ ॥
आनन्दमयरूपस्य फलत्वैकत्वसिद्धये। यद्वद्व्याक्षिस्थरूपस्य न्यायेनानेन निश्चिता ॥ १४८ ॥
ब्रह्मताऽतोऽत्र विज्ञेया हेतुता न्यायसङ्गतिः ॥

अन्तः सूर्येऽक्षिण च यः परिदृश्यते हिरण्मयः पुरुषः यश्चाक्षिण सर्वानुविधायी पुरुषः स आनन्दमयः परमात्मैव, तत्र हेतुस्तद्धर्मोपदेशात्। तस्य ब्रह्मणो धर्मोऽसाधारणो धर्मः अपहत-पाप्मत्वादिः, तस्योपदेशादिति सूत्रार्थः।

हेत्वन्तरमाहुः—

## भेदव्यपदेशाच्चान्यः ॥ १–१–२० ॥

इतः सूर्यमण्डलस्थः परमात्मा। कुतः? भेदव्यपदेशात्। स च "य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद" इत्यादिनोक्तः।

इत्यन्तस्तद्धर्माधिकरणम् ॥ ६ ॥

## आकाशस्तल्लिङ्गात् ॥ १–१–२१ ॥

अथ प्रसङ्गसङ्गत्या तल्लिङ्गन्याय उच्यते ॥ १४९ ॥
आकाश इति होवाचेत्यस्यायं विषयो मतः। भूताकाशो ब्रह्म वेति भूताकाशोऽत्र न बृहत् ॥ १५० ॥
लिङ्गप्राबल्यतो ज्ञेयः परमात्मैव नेतरः।

ब्रह्मलिङ्गात्प्रकरणापेक्षया लिङ्गस्यैव प्राबल्यादत्राकाशपदवाच्यं ब्रह्मैवेति सूत्रार्थः ॥

इति तल्लिङ्गाधिकरणम् ॥ ७ ॥

## अत एव प्राणः ॥ १–१–२२ ॥

अत्राधिकरणे ज्ञेया सङ्गतिर्ह्यातिदेशिकी ॥ १५१ ॥
प्राण इति होवाचेत्यस्यायं विषयो मतः। प्राणशब्दः किमासन्यं प्राणं वा वक्ति ब्रह्म किम् ॥ १५२ ॥
तत्राद्यपक्षौ पूर्वस्मिन्पक्षे लिङ्गाद्बृहत् परे।

अत एव लिङ्गादेव प्राणशब्दवाच्यं ब्रह्मैवेति सूत्रार्थः। विशेषस्तु भाष्येऽनुसन्धातव्यः ॥

इत्यधिदेशाधिकरणम् ॥ ८ ॥

## ज्योतिश्चरणाभिधानात् ॥ १–१–२३ ॥

अथोपोद्धातसङ्गत्या प्रासङ्गिक्याऽथवा ह्यदः ॥ १५३ ॥
"अतः परो दिवोज्योति"रतज्योतिश्च पूरुषे। विषयोऽस्यात्र किं ज्योतिःशब्दो ज्योतिस्तु प्राकृतम् ॥ १५४ ॥
अभिधत्ते ब्रह्म किं वा तत्राद्यः पक्ष एव हि। ब्रह्मासाधारणो धर्मो यतो नैवात्र लभ्यते ॥ १५५ ॥
पादानां ब्रह्मधर्मत्वाद्ब्रह्मैवात्राभिधीयते। ज्योतिषो द्युपरस्यैव तुरीयचरणत्वतः ॥ १५६ ॥
अत्राभिधानं तेनात्र वाच्यं ब्रह्मैव नेतरत्।

"अथ यदतः परो दिवो ज्योतिरि"त्यत्र ज्योतिःपदवाच्यं ब्रह्मैव। कुतः? ज्योतीरूपस्य ब्रह्मण एव तुरीयचरणस्यैवात्र निरूपणादिति सूत्रार्थः ॥ २३ ॥

ननु नात्र चतुष्पाद् ब्रह्मैवाभिधातुं शक्यं, गायत्रीछन्दसोऽप्यभिधातुं शक्यत्वादित्यत आह भगवान् सूत्रकारः—

## छन्दोऽभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम् ॥१-१-२४॥

छन्दसो गायत्र्याख्यस्य निरूपणान्न चतुष्पाद्ब्रह्माभिधानम् । नेत्यर्थः । "गायत्री वा व इदं सर्वमि"त्युपक्रम्य "सैषा चतुष्पदा षड्विधा गायत्री"त्यादिनिरूपणात् । "यद्वै तद्ब्रह्मे"ति ब्रह्मपदमपि प्रकृतत्वाच्छन्दसस्तत्परमेव ब्रह्मोपनिषदितिवत्, इति चेन्नेति । पूर्वोक्तं नेत्यर्थः । तत्र हेतुः, तथा चेतोर्पणनिगदात् । तथा तेन द्वारेण चेतसोऽर्पणं ब्रह्मणि निवेशनं निगद्यते । सूचिद्वारा वाससि सूत्रप्रवेशवद्गायत्रीप्रतिपाद्ये ब्रह्मणि बुद्धिप्रवेश इति । कुत एवं, तत्राह—तथा हि दर्शनमिति । तथा तेनैवोक्तप्रकारेण दर्शनं ज्ञानं भवतीति स्थूलबुद्धेः प्रवेष्टुमशक्यत्वात् । स्वतःप्रवेष्टुमशक्तमुपायेन प्रवेशयन्तीति हिशब्दार्थः । एतेनैव सर्वा मन्त्रापासना व्याख्याताः । तस्मात्पादा ब्रह्मधर्माः ॥

अत्रोपपत्त्यन्तरमाहुः—

## भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ १-१-२५ ॥

एवं पूर्वोक्तप्रकारेण अस्य भूतादीत्यादिनाऽन्वयः । भूतानि प्राणिनः, आदीनि येषां पृथ्वीशरीरहृदयादीनां भूतादयः, ते च ते पादाश्चेति तथा । तेषां व्यपदेशो गौण्या वृत्त्या निरूपणं, तस्य उपपत्तिर्युक्त्या वेदाविरुद्धया प्रतिपादनं तस्मात्, चकारस्तु अर्थस्यैव पादा भवन्ति न शब्दस्येत्यर्थसमुच्चायक इति सूत्रार्थः । अयमाशयः—शब्दस्यैकत्र मुख्यवृत्तिमन्तरा गौण्यसम्भव इति शाब्दी स्थितिः । एवं च सति मुख्यवृत्त्या ब्रह्मण एव पादास्तद्वाचकत्वेन गायत्र्यां गौण्योपसंहृतिरुपपद्यते इति ।

पुनः प्रकारान्तरेणाशङ्क्य परिहरति—

## उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ १-१-२६ ॥

द्विधा ह्यत्र पूर्वः पक्षः । तत्समाधिरपि द्विधा । ननु "त्रिपादस्यामृतं दिवीति" मन्त्रे सप्तम्या आधारत्वं प्रतिपाद्यते । "अथ यदतः परमि"त्यत्र पञ्चम्या अनाधारत्वम् । उपदेशात् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमित्यर्थः इति चेन्नेति । इतिः पूर्वोक्तं परामृशति । तत्र हेतुः । उभयस्मिन्नित्यादि । मन्त्रे दिव्येवोक्तं तत्सत्त्वम् । "अथ यदतःपरमि"तिवाक्ये तु सर्वत्रापि तत्सत्तोच्यते । यद्यप्यत्रातःपरपदाभ्यां विभागः प्राप्यते, तथापि "विश्वत" इत्यादिलोकेष्वियं तैः पदैः सर्वत्रैव तत्सत्त्वमग्र एव निगमयति वाक्यमिदम् । तस्माद्विभक्तिद्वयनिर्देशो न विरुद्ध्यत इत्येकः प्रकारः । द्वितीयस्तु मन्त्रे अमृतपदं अथ यदत इति वाक्ये ज्योतिःपदमत उपदेशभेदान्नैकवाक्यता मन्त्रयोरिति चेन्नायं दोषः । उभयस्मिन् ज्योतिःपदे अमृतपदे प्रयुक्तेऽपि तदुभयशब्दयोरेकार्थतया विरोधाभावादेकवाक्यत्वम् । अतोऽत्र चरणसद्भावात्तस्य च ब्रह्मधर्मत्वाज्ज्योतिर्ब्रह्मैवेति सिद्धान्तः ।

## प्राणस्तथानुगमात् ॥ १-१-२७ ॥

आतिदैशिकसङ्गत्या ह्ययं न्यायः प्रदर्श्यते ॥ १५७ ॥

पूर्वाधिकरणं शब्दमात्रे सन्देहवारकम् । इदं बाधकसद्भावेऽप्यार्थसन्देहनाशकृत् ॥ १५८ ॥

कौशितकीब्राह्मणे हि प्रतर्दनमरुत्वतोः । सम्वाद इन्द्रवाक्यं हि प्राणो वा अहमस्मि यत् ॥ १५९ ॥

तदेव विषयो ह्यस्य विषयप्राणवाच्यगः । अत्र किं भौतिकः प्राणः किमासन्य उत बृहत् ॥ १६० ॥

बाधकानां हि सत्त्वे च साधकस्याप्यभावतः । पूर्व एवात्र पक्षः स्यात्तत्रान्त्यो ह्युपपत्तितः ॥ १६१ ॥

अधिकरणषट्कसूत्राणामर्थास्त्वेवं बोध्याः । अत्र हि चतुःसूत्रैः सिद्धान्तनिरूपणम् । तत्र पूर्वेण

ब्रह्मत्वसाधकहेतुप्रदर्शनम् । अग्रेतनैः त्रिभिः सूत्रैः ब्रह्मत्वबाधकनिराकृतेस्तत् । प्राणः परमात्मैव भवितुमर्हति । कुतः ? तथाऽनुगमात् । तथा हि तरतमत्वेन अनुगमः ऐक्यं तस्मात् । तरतमत्वं च ब्रह्मत्वेनैव । तथा हि । उपक्रमोपसंहाराभ्यां विचार्यमाणे सर्वस्मिन्वाक्ये सर्वपदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते । अन्यथा "मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये" इत्युपक्रमविरोधापत्तेः । तथा च प्राणप्रज्ञात्मादिशब्दैः । सर्वत्र ब्रह्मैव प्रतिपाद्यत इति सिद्धम् ॥

बाधकान्निराकुर्वते—

## न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥१–१–२८॥

आशङ्कते । नेति । प्राणो ब्रह्म न, तत्र हेतुर्वक्तुरित्यादि । वक्तुरिन्द्रस्य य आत्मा तस्यैव "प्राणो वाह मसी"त्यादिना प्राणतयैवोपास्यत्वेन वाचोधेनुत्ववदुपदेशात् । तत्रोक्तान्यधर्माणां प्राणत्वार्थत्वात् । समादधते—अध्यात्मेत्यादिना । आत्मानमधिकृत्य यः सम्बन्धः, स तथा, तस्य भूमा बाहुल्यम् । अत्रात्मशब्दो ब्रह्मवाची । अस्मिन्प्रकरण इत्यर्थः । अयम्भावः, प्राणस्य प्रज्ञात्मत्वादिवाचोवेद्यत्वं चोपक्रम्य तद्यथा "रथस्यारेषु नेमिरर्पिते"त्यादिना आरनाभिभूतं प्रत्यगात्मानमेवोपसंहरति । स चोपसंहारो ब्रह्मण एव प्रकरणित्वेन घटते नान्यथेति । अतोऽध्यात्मसम्बन्धबाहुल्याद्ब्रह्मोपदेश एवायमिति ॥

बाधकसङ्गतिं दर्शयन्ति ॥

## शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ १–१–२९ ॥

बाधकशङ्कानिवृत्त्यर्थकोऽयं तुशब्दः । नायं वक्त्रात्मोपदेशो लोकदृष्ट्या, किन्तु, "अहं ब्रह्मे"त्यार्षेण दर्शनेन । ननु नेदं वक्तुं शक्यम् । "तत्त्वमसी"त्यादिवाक्योदाहृतरीत्या स्वात्मन एव ब्रह्मत्वावगतिः फलाय, न तु परस्य वक्तुरात्मनो ब्रह्मत्वावगतिस्तथा तदुपासनं वा शास्त्राऽवरोधात् । अत आहुर्वामदेववदिति । यथा वामदेवे ज्ञानावेशा"दहं मनुरभवमि"त्यादि सर्वधर्मस्फूर्त्तिस्तथात्र ब्रह्मावेशादुपदेश इति । ननु स्वाप्ययसम्पत्त्योरिति सूत्रात्सुषुप्तौ ब्रह्मधर्माविर्भावो न त्वन्यदपीति कथमेवमिति चेन्नैवम्; उपदेशभावनादिष्वपि कदाचित्तदुत्तमाधिकारे ब्रह्मभाव प्राकट्याङ्गीकारात् । "मय्येव सकलं जातमि"त्यादिवाक्याऽनुरोधात् । प्रायिकत्वाच्च न तद्वचनम् ॥

## जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह च तद्योगात् ॥ १–१–३० ॥

नन्वस्मिन्प्रकरणे यथा ब्रह्मधर्मश्रुतिस्तद्वज्जीवमुख्यप्राणधर्मश्रवणमप्यस्ति । "न वाचं विजिज्ञासीत वक्तारं विद्यादि" त्यादिना वक्तुर्जीवस्य विज्ञेयत्वमभिधीयते । "अथ खलु प्राणप्रज्ञात्मे"त्यादिना विधारयामी"त्यन्तेन मुख्यप्राणधर्मश्रवणात् । तथा च जीवमुख्यप्राणलिङ्गयोः सत्त्वेन नैकान्ततो ब्रह्मैवेति निर्णेतुं शक्यम् । किन्तु, जीवासन्यब्रह्मधर्माणां त्रयाणामपि श्रवणाज्जीवादित्रयाणामप्युपासायां स्वातन्त्र्येणाभिधानमिति । नैष दोषः । उपासात्रैविध्यात् । तथासत्युपास्तित्रैविध्यापत्तेरित्यर्थः । तच्च वाक्यभेदान्न वक्तुं शक्यम् । ननु तर्हि तदुभयलिङ्गयोः कथनविरोध इत्यत आहुः—आश्रितत्वादित्यादि । अत्रेहेति यस्य पूर्वोत्तरपदयोरप्यन्वयः । अत्र पूर्वपदेन जीवस्य ब्रह्मणि आश्रितत्वात्तल्लिङ्गस्यापि ब्रह्मपरत्वमेवेति विरोधः परिहृतः, उत्तरेण तेन तु मुख्यप्राणस्यापि, तेन ब्रह्मणा सह योगात् तल्लिङ्गस्यापि ब्रह्मपरत्वमेवेति तत्परिहारः ॥

॥ इति श्रीवल्लभनन्दनपादपद्मरसालिश्रीरघुनाथात्मजव्रजनाथेन विरचितायां वैयासदर्शनन्यायमालायां प्रथमाध्यायस्य प्रथमः पादः ॥

Acc. No. 1177
Date

॥ श्रीकृष्णाय नमः ॥

## प्रथमाऽध्याये द्वितीयः पादः ।

नमः श्रीवल्लभाधीशपादाब्जनखरोचिषे । यदीयस्मृतिरेवाशु हृदयान्ध्यविनाशिनी ॥ १ ॥

### सर्वत्र प्रसिद्धोपदेशात् ॥ १–२–१ ॥

अथाद्यस्य द्वितीयाङ्घ्रौ सङ्गत्याऽवसरात्मना । पूर्वाधिकरणं तत्र विषयादि प्रदर्श्यते ॥ १ ॥
"सर्वं खल्वि"त्युपक्रम्य मनोमय इतीरितः । द्वितीयवाक्ये तत्र मनोमयपदेन किम् ।
विज्ञानमयजीवोऽत्र वाच्योऽथ ब्रह्मवात्र किम् ॥ २ ॥
सत्यसङ्कल्पवचनाज्जडोपास्तिवदत्र हि । ब्रह्मत्वेनैव जीवस्योपास्तेरेव विधानतः ॥ ३ ॥
जीवे तत्पदवाच्यत्वं नाऽतोऽत्र ब्रह्मवाचिता । अतो नेदं ब्रह्मवाक्यं ब्रह्मैवात्रोपदिश्यते ॥ ४ ॥
सर्ववेदप्रसिद्धं हि ब्रह्मवाक्यमिदं ततः ॥

सूत्रार्थस्तु सर्वत्र वेदान्तेषु प्रसिद्धं यद्ब्रह्म तस्यैवात्रोपदेशात् । "अथ खल्वि"त्यादि ब्रह्मवाक्यमेव । अतो मनोमयत्वादिधर्मविशिष्टब्रह्मवाच्येवेदं पदम् ॥

ननु "क्रतुमयः पुरुष" इति यथासङ्कल्पं लोकान्तरे देहान्तरप्राप्त्युक्तेर्नायं ब्रह्मोपदेशः, किन्तु तथा-जीवोपासनमेव । ब्रह्मज्ञानस्य च मुख्यफलार्थत्वात् । न हि जातसाक्षात्कारस्य देहान्तरमुपपन्न-मित्याशङ्क्याहुः—

### विवक्षितगुणोपपत्तेश्च ॥ १–२–२ ॥

क्रतुरूपफलत्वेन विवक्षिता गुणात्मिका लोकान्तरे परलोके तादृशरूपप्राप्तिः, सा जातसाक्षा-त्कारस्याप्युपपन्नैव सारूप्यादिलाभात् । अत्र लोकान्तरप्राप्तेर्निर्दोषत्वाय गुणत्वेन व्यपदेशः । ननु कथमेवमिति चेत् ब्रूमः, भगवत्सेवोपयोगिभगवल्लोकस्यालौकिकदेहस्याप्राकृतत्वेन निर्दोषत्वा-द्गुणरूपतैवेति परमशान्तस्योक्तोपासनया निर्मलान्तःकरणस्य लौकिकविषयसङ्कल्पानुदयादेव प्राकृत-देहस्यासम्भावनाया एवाभावात् । ननु व्याप्तिबलान्न तथा वक्तुं शक्यमिति चेन्मैवम्; "यथा-क्रतुरि"त्याद्युदाहृतव्याप्तावसङ्कुचितवृत्त्या यथातथापदाभ्यां प्राकृताप्राकृतसाधारणसाधनफलनिरूपणस्य सुवचत्वात् । अयम्भावः । इह लोके यथाक्रतुर्भवति पुरुषः, यत्प्रकारकः क्रतुर्यस्य स यथाक्रतुः । अत्र क्रतुशब्देन प्रकारणबलादुपासनैव ज्ञेया, स पुरुष इत अस्माल्लोकात्प्रेत्य मृत्वा तथा भवति कृतसङ्कल्पानुरूपफलभाग्भवतीति । तथा च ज्ञानानां प्राकृतत्वे फलमपि प्राकृतं तेषामप्राकृतत्वे त्वप्राकृतमेव फलं भवति सामान्यमुखीयं व्याप्तिर्न तु प्राकृततन्मात्रविषयेति । सत्यसङ्कल्पवचनाच्चेति चार्थः । तथा च हेतुद्वयेन ब्रह्मवाक्यमेवेदमिति फलितोऽर्थः ॥

ननु तथा"प्यात्मानं चेद्विजानीयादि"त्यादिना जीवस्य मन्तव्यत्वोपदेशाल्लोकान्तरे देहप्राप्तेः सम्भवदुक्तिकत्वाच्चोपपत्तेरुभयत्रापि तौल्यान्नैकान्ततो ब्रह्मवाक्यत्वनिर्णय इत्याशङ्क्य परिहरन्ति—

### अनुपपत्तेस्तु न शारीरः ॥ १–२–३ ॥

आनन्दरूपप्राणशरीरत्वानुपपत्तेर्न वाक्यार्थो जीवः । उपदेशानर्थक्यभिया न प्राणादिर्लौकिको वक्तुं शक्यः । तुशब्दः पूर्वपक्षनिवृत्तिबोधकः । अत्रोपपत्तिर्भाष्ये स्फुटैव ॥

ननु आनन्दरूपप्राणशरीरत्वोक्तिस्तादृशजीवोपासनयोपासकप्राप्तव्यतादृशफलाभिप्राये वेत्याशङ्क्य परिहरन्ति—

## कर्मकर्तृव्यपदेशाच्च ॥ १–२–४ ॥

सूत्रं व्याकुर्वन्ति एतमित्यादिना फलवाक्योपन्यासपूर्वकतदर्थकथनमुखेन । एवंच कर्म च कर्ता च कर्मकर्त्तारौ तयोर्व्यपदेशात् । भावप्राधान्ये तु तयोर्भावस्तत्त्वे ताभ्यां व्यपदेशादिति सूत्रार्थः सिद्ध्यति । अग्रे च मनोमय इत्यादिना भजनीयस्वरूपनिरूपणाच्चेति चस्यार्थः । अधिकरणसम्पूर्णत्वद्योतकश्च चः । तथा च फलवाक्ये एतमित्यनेन आनन्दरूपप्राणशरीरस्य कर्मत्वेन ध्येयत्वेनाभिसम्भवितास्मीत्यनेन शारीरस्य क्रतुकर्तृत्वेन निरूपणान्नेदं जीववाक्यं, किन्तु ब्रह्मवाक्यमिति फलितोऽर्थः ॥

इति सर्वत्रप्रसिद्धाधिकरणम् ॥ १ ॥

## शब्दविशेषात् ॥ १–२–५ ॥

अथाधिकरणं ह्येतत्प्रसङ्गेन प्रदर्श्यते । न्याये ह्यस्मिन् यथा व्रीहिरिति वाक्य उदाहृतः ॥ ५ ॥
हिरण्मयो हि पुरुषः स किं जीवोऽथवा बृहत् । उपक्रमबलीयस्त्वाद्ब्रह्म तज्जीवमेवमेव हि ॥ ६ ॥
जरायुजादिभेदेन देहानामुपपत्तये । आराग्रमात्रमानेन फलतस्तं हिरण्मयम् ॥ ७ ॥
न हीदृशाभाससमं वर्त्तितुं ब्रह्म त्वर्हति । शब्देनैव विशेषस्योदाहृतत्वाद्धिरण्मयः ॥ ८ ॥
ब्रह्मैवात्रापि निर्दिष्टं फलत्वं नापि तस्य तु । तत्प्राप्तेरेव फलताऽऽनन्दवद्युक्तितोऽत्र हि ॥ ९ ॥
बलीयस्तोपसंहारे ततोऽधिकतरं पृथक् ॥ १० ॥

सूत्रार्थस्तु शब्देनैव विशेषः शब्दविशेषस्तस्मात्तथा । तथाच शब्देन हिरण्मयशब्देनैव जीवाद्विशेषस्य आनन्दैकरूपस्योक्तत्वान्नेदं जीववाक्यम्, किन्तु ब्रह्मवाक्यमिति । अन्तस्तद्धर्माधिकरणवदिदमप्यधिकरणं पूर्वाधिकरणस्यैव शेषभूतं ज्ञेयम् ।

ननु हृदयस्थितिरूपजीवलिङ्गाज्जीववाक्यमेवेदमित्याशङ्क्य नियमाभावं प्रदर्शयन्तो ब्रह्मवाक्यत्वं दृढयन्ति—

## स्मृतेश्च ॥ १–२–६ ॥

तथाच स्मृत्युपोद्बलनाद्धृदि स्थितः परमात्मैव ।

नन्वपरिच्छिन्नस्य हृदिस्थितिरणुपरिमाणत्वं चायुक्तमित्युपक्रमप्राबल्यान्न ब्रह्मेत्याक्षेपं परिहरन्ति—

## अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥१–२–७॥

अर्भकं अल्पं ओकः स्थानं हृदयरूपं यस्य तत्त्वात् । व्रीह्यादितुल्यपरिमाणकथनाच्च नास्य ब्रह्मवाक्यत्वमिति तन्निषेधन्ति–नेति । जीववाक्यत्वं नेत्यर्थः । हृदये द्रष्टव्यत्वात्तदोकस्त्वम् । व्योमवच्चैवैतद्व्यपदेशभाक्त्वमित्यर्थः । तद्व्यपदेशप्रयोजनं चतुर्विधभूतान्तरत्वख्यापनम् । पूर्वोत्तरपक्षयोर्यच्चकारद्वयं तदेतादृशवाक्यान्तरे पूर्वोत्तरपक्षयोरनुक्तयोरपि वैलक्षण्योपपत्त्योर्बोधनार्थम् । इत्थं चास्याधिकरणान्तरत्वं सूचितम् । अत एव प्राण इतिवत् । अत्र विषयत्वेन तैत्तिरीयोपनिषदुक्त"मादित्यो वा एषतन्मण्डलमि"त्याद्युदाहर्त्तव्यं वाक्यान्तरं ज्ञेयम् ॥

ननु सर्वहृदयस्थत्वे जीववत्सुखदुःखसाक्षात्कारापत्तिरित्यत आहुः—

## सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ १–२–८ ॥

सर्वहृदयायतनत्वे जीवस्येव ब्रह्मणोऽपि सुखादिसाक्षात्कारः स्यादिति प्राप्ते आहुर्नेति । वैशेष्या-

दिति । विशेषस्य भावस्तत्त्वं स च सर्वरूपत्वादिरूपः । तद्भावस्य ब्रह्मण्येव सत्त्वान्न तस्य तत्प्रसक्तिः ॥

॥ इति शब्दविशेषाधिकरणम् ॥ २ ॥

## अत्ता चराचरग्रहणात् ॥ १–२–९ ॥

अथावसरसङ्गत्या न्यायमात्रमुदीर्यते । तत्राद्ये कठवल्लीषु यस्य ब्रह्मेत्यसौ मतः ॥ ११ ॥
विषयोऽत्र हि यच्छब्दार्थोऽत्ता जीव उत बृहत् । उपसेचनयुग्लोकसिद्धमुक्तेः स्थितेरपि ॥ १२ ॥
अन्नानादादिमो नान्यश्चराचरभुजेर्ग्रहात् । भोक्तृत्वसाधनं ज्ञेयं फलमस्योपपत्तितः ॥ १३ ॥

सूत्रार्थस्तु । भगवानेवात्ता, न जीवः । तत्र हेतुः, चरस्य मृत्योः अचरस्य ब्रह्मादिरूपस्य च ग्रहणात् । "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन"इत्यत्र ग्रहणात् । तथाचोक्तोभयविधचराचरमत्तुमपटुत्वान्न जीव इत्यर्थः । अत्राप्यतिशयो दृष्टः स्वार्थानितिलङ्घनात् इतिन्यायश्चिन्त्यः ॥

ननु ब्रह्मणो भोक्तृत्वनिषेधाज्जीव एवात्र कुतो न स्यादित्यत आहुः—

## प्रकरणाच्च ॥ १–२–१० ॥

ब्रह्ममाहात्म्यप्रकरणान्न जीववाक्यमित्यर्थः । भोक्तृत्वं च माहात्म्य एवेति भावः ॥

॥ इति अत्ताचराचराधिकरणम् ॥ ३ ॥

## गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ १–२–११ ॥

"ऋतं पिबन्ताविति किं जीवद्वयनिरूपणम् । अथेशजीवयोः किं वा तत्राद्यो हि समत्वतः ॥ १४ ॥
ब्रह्मप्रकरणस्येह तयोश्चाग्रे निरूपणात् । जडत्वाद्बुद्धिमनसोर्द्वयोरपि न सङ्ग्रहः ॥ १५ ॥
मैवं, गुहां प्रविष्टौ हि जीवेशावन्यवाक्यतः । तथा श्रुतेः सङ्गतिस्तु न्याये प्रासङ्गिकी मता ॥ १६ ॥

सूत्रार्थस्तु । गुहां हृदयं आत्मानौ जीवात्मपरमात्मानौ यतो विषयवाक्यार्थसङ्गतिरस्मिन्पक्षे एवातः परमात्मात्मपक्ष एव युक्त इति हिशब्दार्थः । नन्वप्रकृतत्वान्नायं पक्षो युक्त इत्यत आहुस्तद्दर्शनादिति । तयोर्दर्शनं तद्दर्शनं तस्मात् । प्रकरण एव जीवब्रह्मणोः प्रतिपाद्यतया दर्शनादिति ॥

## विशेषणाच्च ॥ १–२–१२ ॥

विशेषणानां सङ्गतेरित्यर्थः । सा "त्वणोरणीयान्", "आत्मानं रथिनं विद्धी"त्यादिपूर्वोत्तरवद्युक्तानि । तथा च जीवब्रह्मपक्ष एवोक्तविशेषणानि सङ्गच्छन्ते । अन्यथा तान्यसङ्गतान्येव स्युः । चः प्रकरणोक्तेः सर्वोपपत्तिसमुच्चायकः ॥

॥ इति गुहां प्रविष्टावित्यधिकरणम् ॥ ४ ॥

## अन्तर उपपत्तेः ॥ १–२–१३ ॥

"य एषोऽन्तरक्षिण्यु"क्तप्रतिबिम्बनरस्य हि । ब्रह्मत्वेनोपासनार्थमदो वाक्यमथ बृहत् ॥ १७ ॥
निरूपयति किं तत्र दर्शनात्प्रतिबिम्बकः । ब्रह्मप्रकरणस्यापि समाप्तेस्तस्य चात्र हि ॥ १८ ॥
एत आत्मेत्यादिना तु ब्रह्मत्वोपास्तितस्तथा । अन्वयो ब्रह्मधर्माणां तत्त्वेनैव भविष्यति ॥ १९ ॥

इत्याद्यो न हि किं त्वन्यस्तद्दृश्यत्वोपपत्तितः ॥

सूत्रार्थस्तु । अन्तरः, योऽक्षिमध्ये दृश्यते पुरुषः स परमात्मैव । कुतः ? उपपत्तेः तस्य दर्शनाद्युपपत्तेरिति ॥

## स्थानादिव्यपदेशाच्च ॥ १–२–१४ ॥

"एतं संयद्वाम इत्याचक्षते" इतिप्रकृत्य "एतꣳ हि सर्वाणी" त्यादिना स्थानत्वभाक्तत्वादिधर्मैर्व्यपदेशाद्ब्रह्मवाक्यमेव तदित्यर्थः । एतत्तुल्यवाक्यस्याप्ययमेवार्थ इति चकारेण ज्ञापयति ॥

ननु कोऽयमाग्रहो ब्रह्मवाक्यत्वेनोपासनापरत्वमेव कुतो न मनुते भवानित्याशङ्कां परिहरन्ति—

## सुखविशिष्टाभिधानादेव च ॥ १–२–१५ ॥

सुखेन विशिष्टं सुखविशिष्टं सुखमानन्दः, तस्याभिधानात् । अमृतपदेनाभिधानाद्ब्रह्मवाक्यमेवेदः । चकारः सदादिसमुच्चायकः ॥

स्वरूपतो निर्णीय फलतो निर्णयमाहुः—

## श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १–२–१६ ॥

श्रुता उपनिषद् येन तस्य ब्रह्मविदो या गतिर्देवयानाख्या साऽक्षिपुरुषविदोऽप्युच्यते । "अथ यदुवैवास्मिन्नि" त्यादिना । चकारस्तूक्तसमुच्चायकतयाऽधिकरणसम्पूर्णत्वबोधकः ॥

इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयन्ति—

## अनवस्थितेरसम्भवाच्च नेतरः ॥ १–२–१७ ॥

यः पूर्वोक्तोत्तरः पक्षः स एव तु निषेधतः ॥ २० ॥
आत्मनामुपपत्त्यास्मिन्सुदृढः क्रियते पुनः ॥

सूत्रार्थस्तु—इतरः प्रतिबिम्बो न, वाक्यार्थो नेत्यर्थः । तत्र हेतुद्वयम् । अनवस्थितेः अस्थिरत्वात् । द्रष्टुरपगमे प्रतिबिम्बापगमात् । मनसा ह्युपासने चक्षुरादेर्निरोधात्, प्रतिबिम्बासम्भवस्तस्मात् । तथात्वाङ्गीकारे त्वासुरसिद्धान्तत्वापत्त्यर्थकश्चः ॥

इति अन्तर उपपत्तेरित्यधिकरणम् ॥ ५ ॥

## अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १–२–१८ ॥

इमं च लोकमिति श्रुतिसद्धे ह्यदो वचः ॥ २१ ॥
अधिदैवमधिलोकमित्यादिश्रूयतेऽत्र किम् । अन्तर्याम्यधिदैवादिष्वेक एवोतभिद्यते ॥ २२ ॥
अधिदैवादिनाम्नैव भिद्यते सो न तानि तु । निषिद्धत्वात्कल्पयितुं शक्यन्ते परमात्मनि ॥ २३ ॥
उच्यतेऽत्राधिदैवादावन्तस्थः कृष्ण एव हि । तद्धर्मव्यपदेशाद्धि तत्सञ्ज्ञानं विरुद्धते ॥ २४ ॥

सूत्रार्थस्तु—अधिदैवादिष्वन्तर्यामी भगवानेव । कुतः ? तद्धर्मव्यपदेशात् । तेषां अधिदैवानां धर्माः तत्तत्कार्ये सामर्थ्यं च भगवत एव न स्वतः अत्र परात्तु तच्छ्रुतेरिति न्यायोऽनुसन्धेयः ।

## न च स्मार्तमतद्धर्माभिलापात् ॥ १–२–१९ ॥

ननु ब्रह्मवादे जडजीवब्रह्मातिरिक्तपदार्थाऽसिद्धेः, साङ्ख्यस्मृतिसिद्धप्रकृत्यभिमानितयाऽन्तर्यामिस्वरूपमस्तु, न तु तद्भिन्नं ब्रह्मस्वरूपमित्याशङ्क्योच्यते । न च स्मार्तमिति । साङ्ख्यस्मृतिसिद्धं अन्तर्यामिस्वरूपं नात्र भवितुमर्हति । कुतः ? अतद्धर्माभिलापात् । साङ्ख्यसिद्धस्य धर्माणामभिलापाभावात् । ते च धर्माः सत्त्वादयः । न तद्धर्मा अतद्धर्मास्तेषामभिलापादिति वाऽर्थः । ते च "यस्य पृथिवी शरीरं इत्यादयः ॥

## शारीरश्चोभयेऽपि हि भेदेनैनमभिधीयते ॥ १–२–२० ॥

नन्वस्तु शारीर एवान्तर्यामीत्यत्राहुः—शारीरश्चेति । अत्रादौ नेत्यनुवर्त्तते । शारीरश्च जीवो नान्तर्यामी, यस्य पृथिवी शरीरमितिवाक्यानुरोधात् । हि यस्माद्धेतोः । उभये इति । काण्वा माध्यन्दिनाश्च ब्राह्मणाः । "यो विज्ञाने तिष्ठन्निति"माध्यन्दिनाः । एनमन्तर्यामिणं जीवभेदेन पठन्तीति सूत्रार्थः ॥५॥

इति अन्तर्याम्यधिकरणम् ॥ ६ ॥

## अदृश्यत्वादिगुणको धर्मोक्तेः ॥ १–२–२१ ॥

कस्मिन्नु भगवो ज्ञात इति पृष्टे हि मुण्डके परापरत्वरूपेण विद्ये द्वे विनिरूपिते ॥ २५ ॥
परस्यां तत्र सन्देहः किमेषा साङ्ख्यशास्त्रगा । साङ्ख्यधर्माभिलापाद्वा ब्रह्मविद्येति तत्र हि ॥ २६ ॥
अक्षरात्सृष्टिरुक्त्वाऽथ पुरुषात्सोच्यते पुनः । तयोर्भिन्नतया ब्रह्मवादे सङ्गच्छते न तत् ॥ २७ ॥
अतः साङ्ख्यमतं ह्येतत् स्रष्टृत्वोक्तिर्यतस्तयोः । अदृश्यत्वादिगुणकः परमात्माऽभिधीयते ॥ २८ ॥
ब्रह्मविज्ञप्तितः सर्वविज्ञप्तेर्हि निरूपणात् ।

अदृश्यत्वादिगुणकः परमात्मैव । कुतः ? धर्मोक्तेः । ब्रह्मधर्मोक्तेरिति सूत्रार्थः ॥

## विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ १–२–२२ ॥

विशेषणभेदस्तु अदृश्यत्वदिव्यत्वादि । व्यपदेशभेदश्च ब्रह्मविद्यैवैषेति । अयं च "स ब्रह्मविद्यामि"त्युपक्रमादिवाक्यैरुपक्रमादिषु स्पष्ट एव कृतः । अत्र भेदशब्दस्य हि यथायोग्यमार्थिकोऽन्वयः । देहलीदीपन्यायेन तथा वाऽन्वयः । ब्रह्मणा स्वपुत्राय सार्त्तविद्याया अनुपदिष्टत्वाच्चेति चकारार्थः ॥

## रूपोपन्यासाच्च ॥ १–२–२३ ॥

रूपस्य उपन्यासस्तस्मात् तच्च "अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावि"त्यादित्याद्युक्तविश्वकायस्य । अस्या उपपत्तेर्मुख्यत्वसूचनार्थोऽयं सूत्रविभागः । सर्वेषां वेदान्तवाक्यानामेकवाक्यत्वानुपपत्त्या तद्विरोधश्चेति चकारार्थः । तस्मादेषा ब्रह्मविद्यैवेति सिद्धम् ॥

इति अदृश्यत्वाधिकरणम् ॥ ७ ॥

## वैश्वानरः साधारणः शब्दविशेषात् ॥ १–२–२४ ॥

रूपवत्त्वस्य पूर्वोक्तहेतुतासिद्धयेऽधुना । साकारता तु बृहतः सूपपन्ना निरूप्यते ॥
न्यायेनानेन यस्त्वेनमित्यादिविषयो मतः । अस्मिन्वैश्वानरपदम्भिन्नार्थं बृहदर्थकम् ॥
किं वा तत्रान्यदर्थस्याप्रसिद्धेर्वह्निरेव सः । विश्वस्मा अग्निमित्यादिपूर्वकाण्डवचोबलात् ॥
तद्देवता वा ग्राह्याथवा स्याद्धेमगर्भकः । सम्वत्सरो वाऽग्निरित्याद्याश्रुतेरत्र वचोबलात् ॥
वैश्वानरपदं ह्यत्र परमात्मप्रकाशकम् । साधारण्याद्विशेषस्य शब्दोऽप्राबल्यतो ध्रुवम् ॥

सूत्रार्थस्तु—वैश्वानरः परमात्मैव । अत्र हेतुः साधारणेति । साधारणौ यौ वैश्वानरात्मशब्दौ ताभ्यां यो विशेषः प्रादेशमात्रस्यैव द्युमूर्द्धत्वादिरूपः तस्मात् ।

## स्मर्यमाणमनुमानं स्यादिति ॥ १–२–२५ ॥

स्मर्यते तत्स्मर्यमाणं यद्रूपं तदनुमानं स्यात् । प्रादेशमात्रस्य तस्य ब्रह्मत्वे । "केचित्स्वदेहे हृदयाव-

काशे" इत्यादौ स्पष्टम्। स्मरणं हि श्रुतस्य भवति। तत्तु श्रुतिवाक्येभ्य एवेति मूलश्रुतिर्ब्रह्मपरतामनुमापयति । इतिहेत्वर्थकः ।

## शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशाद्-सम्भवात्पुरुषमपि चैनमभिधीयते ॥ १-२-२६ ॥

ननूदाहृतस्मृतिः स्मर्यमाणं रूपं यदि तस्य तथात्वेऽनुमानं, तर्हि "अहं वैश्वानरो भूत्वे"ति स्मृत्यन्तरेण स्मर्यमाणं रूपमन्यार्थस्याप्यनुमापकं स्यादिति जाठरोऽग्निर्वैश्वानर इति शब्दः स चार्थान्तरे रूढः। आदिशब्दात्तस्यैव वैश्वानरस्योपासनार्थे हृदये गार्हपत्यादिना त्रेताग्निकल्पनं अन्तःप्रतिष्ठितत्वमपि पुरुषेऽन्तःप्रतिष्ठितं वेदेति न भगवद्धर्मं इति सोऽपि भिन्नो हेतुस्तत्रैव । हेतुहेतुश्च भवतीति न सूत्रे चकारः । तस्मादेतेभ्यो हेतुभ्यो न भगवान्वैश्वानर इति चेन्न । तथादृष्ट्युपदेशात् । तथादृष्टिर्जाठरदृष्टिः सर्वभोक्तृत्वं भगवतो वक्तुमत्रोपदिश्यते, भगवन्निष्ठानां विरुद्धधर्माणां तत्तद्भावापत्तिबोधनेन भगवतो माहात्म्यमेव वर्णितम् । नन्वेवं कार्यवाक्यमेवास्तु तत्, इति चेत्, तत्राह—असम्भवादिति । द्युमूर्द्धत्वादिधर्माणां कार्येऽसम्भवात् । उपचारादुपास्त्यर्थं परिकल्पनं भवत्विति चेन्न, पुरुषमपि चैनमभिधीयते वाजसनेयिनः "स एषोऽग्निर्वैश्वानरो यत्पुरुष"इत्यादिना । अतो भगवानेव वैश्वानर इति सिद्धम् ॥

## अतएव न देवताभूतश्च ॥ १-२-२७ ॥

उक्तहेतुभ्य एव अग्नेर्देवतापरं नेदं वाक्यमित्यर्थः ॥

## साक्षादप्यविरोधं जैमिनिः ॥ १-२-२८ ॥

पूर्वसिद्धार्थसंसिद्ध्यै परिमाणं निरूप्यते । प्रादेशपरिमाणत्वं विष्णोः साधारणं न वा ॥

तत्र सिद्धान्तपक्षीयाश्चत्वार ऋषयो मताः । जैमिनीयादिसिद्धान्तत्रये स्वारस्यक्षतये ॥

आचार्यवर्यव्यासेन मतं त्रयमनूद्यते । तत्राद्यजैमिनिमते साक्षादस्य विरोधिता ॥

प्रादेशपरिमाणत्वे स्वरूपस्यैव चिन्तनात् ॥

सूत्रार्थस्तु । साक्षात्कल्पनाव्यतिरेकेणापि स्वरूपविचारेणैव व्यापकस्य प्रादेशमात्रत्वे विरोधं मन्यते जैमिनिः । अत्र प्रादेशमात्रस्य प्रकृतत्वेऽपि तन्मात्रविचारमतिहाय व्यापकपरिमाणस्य यत्साधारण्येन परिमाणान्तराविरोधित्वनिरूपणं तत्तत्परिमाणानां विभूतीनामभेदबोधनायेत्याशयः ॥

## अभिव्यक्तेरित्याश्मरथ्यः ॥ १-२-२९ ॥

अत्र अविरोधमित्यस्यानुषङ्गः । तथा च अभिव्यक्तेर्हेतो प्रादेशमात्रत्वादिपरिमाणान्तरेण सहाविरोधं मनुतेऽयमाचार्यः । आविर्भावोऽभिव्यक्तिः । उपासकभावानुरोधेन तत्तद्रूपेण प्राकट्यादित्यर्थः । एतेनैव ब्रह्मणः साकारत्वमपि सूक्तं भवत्येतन्मत इत्यपि ध्वनितम् । निर्दिश्यमानस्य सच्चिदानन्दरूपत्वात् ॥

## अनुस्मृतेर्बादरिः ॥ १-२-३० ॥

बादरिर्नामाचार्यः । अनुस्मृतिश्चिन्तनम् । हेतौ पञ्चमी । तथाच चिन्तनाद्धेतोः प्रादुर्भूतं यद्रूपं साकारं तदनुवादिका श्रुतिरित्यविरोधं मनुत इत्यर्थः । विशेषस्त्वत्र भाष्य आलोचनीयः ॥

## सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ १-२-३१ ॥

कश्चिज्जैमिन्येकदेशी वैश्वानर एव साकाररूपं प्रादेशमात्र एष वैश्वानर इति नियताऽऽकारं नियतप्रादेशमात्रं ब्रह्म मन्यते अपि जैमिनिसिद्धान्तेनैव निराकर्त्तुं पुनर्जैमिनिमतोपन्यासः । स्थानानुरोधेन तदनुगुणा स्थितिः सम्पत्तिस्ततः प्रादेशत्वम् । तथाच सम्पत्तिकृतं प्रादेशत्वं न तु नियतं स्वाभाविकं प्रादेशत्वमिति जैमिनिर्मनुते । तच्छ्रुतिं प्रमाणयतीत्याह तथेति । हि यस्माद्धेतोः श्रुतिस्तथैव वदतीत्यर्थः । श्रुतिश्च "प्रादेशमात्रमिह वै देवाः"इत्यादिरियम् ।

## आमनन्ति चैनमस्मिन् ॥ १-२-३२ ॥

सिद्धान्तोऽयम् । एनं वैश्वानरमस्मिन्मूर्द्धचिबुकान्तराले जाबालाः समामनन्ति । "एषोऽनन्तोऽव्यक्त आत्मे"त्यादिना ॥

इति श्रीवल्लभनन्दनचरणैकतानश्रीरघुनाथात्मजव्रजनाथविरचितायां वैयासदर्शनन्यायमालायां प्रथमाध्यायस्य द्वितीयः पादः ॥

# Additions & Corrections for Vaiyāsanyāyamalā

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| १ | १९ | विस्तरस्य | विस्तरश्च |
| ,, | २२ | सोऽध्यायस्यात् | सोऽध्यायः स्यात् |
| ,, | ३० | प्राच्य ( साङ्ख्य ? ) | प्राप्त° |
| २ | १८ | निरूप्यास्तु° | निरूप्याः स्तु° |
| ,, | ३३ | निरूपतैः | निरूपितैः |
| ३ | २० | अथ शब्दो | अथशब्दो |
| ,, | | अतः शब्दो | अतःशब्दो |
| ,, | ३२ | पूरोवर्ति° | पुरोवर्ति° |
| ४ | ८ | °स्तु शब्दः | °स्तुशब्दः |
| ,, | १६ | °न्येऽपि | °न्येव |
| ,, | १८ | ईक्षति सञ्ज्ञो | ईक्षतिसञ्ज्ञो |
| ,, | २० | °मीक्षते | °मीक्षतेः |
| ,, | २१ | नात्रुचः । | न । कुतः । |
| ,, | २३ | इक्षोक्तेः | ईक्षोक्तेः |
| ,, | २५ | ईक्षति युक्तः | ईक्षतियुक्तः |
| ,, | ३२ | °न्न दृश्ये | °न्नदृश्ये |
| ५ | ३ | °दिदृश्येति | °दिदृश्येतेति |
| ,, | ९ | स्वह्यपीतो | स्वं ह्यपीतो |
| ,, | १४ | गतिर्मोक्षः | गतिर्मोक्षः । |
| ,, | २६ | °श्रयासमा° | °श्रयात्समा° |
| ६ | २ | °स्वेष्ठा° | °स्वेष्टा° |
| ,, | ४ | किञ्चस्या° | किञ्च स्या° |
| ,, | ,, | °ह्म कर्मणोः | °ह्मकर्मणोः |
| ,, | ५ | °दिस्या° | °दि स्या° |
| ,, | ९ | °षा भ्यु° | °षाभ्यु° |
| ,, | १२ | ब्रह्मणे" | "ब्रह्मण" |
| ,, | १४ | येषे" | एषे" |
| ,, | १९ | °ष्टकाष्टका° | °ष्टका° |
| ,, | २१ | °मानेस्व° | °माने स्व° |
| ,, | २२ | नत्व° | न त्व° |
| ,, | २९ | For the missing portion please see appendix I | |
| ७ | १ | For the missing portion please see appendix 2. | |
| ,, | ६ | °ती" ति | °ती" ति । |
| ,, | १५ | drop ब्रह्म विपश्चितेत्यतः | |
| ,, | ,, | ततम् | कृतम् |
| ,, | १६ | विवृत्तिः | विवृतिः |
| ,, | १९ | °मात्वात् | °मानत्वात् |
| ,, | २५ | दाताद्यातार्थ ( ? ) | दार्ढ्यार्थ° |
| ,, | ,, | °सूत्रा° | °सूत्र्ये° |
| ८ | २५ | प्रभा सामो ( ? ) ना° | प्रभासाम्येना° |
| ८ | ३३ | श्रुत्ये ( ? ) वदाते ( ? ) ष्वा° | श्रुत्यैव तेष्वा° |
| १० | १० | मन्त्रा° | मन्त्रो° |
| ,, | १३ | प्राणिनः, | प्राणिनः |
| ,, | २४ | °केष्वियं तैः | °केष्वित्यन्तैः |
| ,, | ,, | °मम एव | °मेव |
| ,, | २८ | सिद्धान्तः | ( पाठभेदः ) सिद्धम् |
| ,, | २९ | Add इति ज्योतिश्चरणाधिकरणम् ॥ ९ ॥ | |
| ११ | ५ | °शब्दैः । | °शब्दैः |
| ,, | ११ | °त्वादिवा° | °त्वादि वा° |
| ,, | १२ | "रथस्या° | "तद्यथा रथस्या° |
| ,, | १८ | शास्त्राऽवरोधात् | शास्त्रविरोधात् |
| ,, | ३१ | °ति यस्य | °तिपदस्य |
| ,, | ३२ | परिहतः | परिहृतः |
| १२ | ७ | ब्रह्मवा° | ब्रह्म वा° |
| ,, | २१ | °स्यास° | ‘स्य स’ |
| ,, | २५ | ‘कृत्वे | ‘कृतत्वे |
| ,, | २६ | ‘ति सा’ | ‘तीति सा’ |
| १३ | १ | ‘प्राये वे’ | ‘प्रायेवे’ |
| ,, | १२ | ‘द्ब्रह्म तज्जीवमेवमेव | ‘द्रूते तज्जीवमेव |
| ,, | २४ | ब्रह्मस्मि’ | ब्रह्म इ’ |
| ,, | २७ | दृष्टव्य | द्रष्टव्य’ |
| ,, | २८ | ‘भाक्त’ | ‘भात्त्व’ |
| १४ | ९ | अत्राप्यति’ | यत्राप्यति’ |
| ,, | ११ | ‘त्म्य एवे’ | ‘त्म्यमेवे’ |
| ,, | २१ | ‘त्तरवद्यु’ | ‘त्तरवह्यु’ |
| १५ | ८ | ‘वेदः । | ‘व । |
| ,, | १९ | दृष्टु’ | द्रष्टु’ |
| ,, | २४ | ‘त्यादिश्रु’ | ‘त्यादि श्रू’ |
| ,, | ,, | ‘तभि’ | ‘त भि’ |
| ,, | २५ | ‘सो | स |
| ,, | २६ | ‘सञ्ज्ञानं’ | ‘सञ्ज्ञा न |
| ,, | ,, | विरुद्धते | विरुध्यते |
| ,, | २८ | स्वतः | स्वतः । |
| १५ | ३३ | शरीरं | शरीरं" |
| १६ | १ | ‘भिधीयते | ‘धीयते |
| ,, | ७ | पृष्ठे | पृष्टे |
| ,, | ,, | मुण्डके | मुण्डके । |
| ,, | २२ | साधारणः शब्द’ | साधारणशब्द’ |
| ,, | २६ | ‘त्याद्याश्रुतेरत्र | ‘त्याद्युत्तरत्र |
| ,, | २७ | शब्दोऽप्रा’ | शब्दे प्रा’ |
| १७ | २ | इतिहे | इतिहै’ |
| ,, | ४ | ‘भिधीयते | ‘धीयते |

| Page | Line | Incorrect | Corret |
|---|---|---|---|
| १७ | ५ | स्मृतिः स्मर्य॰ | स्मृतिस्मर्य॰ |
| ,, | ७ | ॰कल्पनं | ॰कल्पनम् । |
| ,, | ८ | ॰त्रैव । | ॰त्रैव |
| ,, | १५ | अतएव..देवताभू॰ | अत एव..देवता भू॰ |
| ,, | २० | ॰दस्य विरो॰ | ॰दप्यविरो॰ |
| ,, | २२ | ॰मात्रत्वे विरो॰ | ॰मात्रत्वेऽविरो॰ |
| ,, | २६ | ॰र्हेतो | र्हेतोः |
| १८ | २ | एष | एव |
| ,, | ३ | ॰प्रादेश॰ | ( पाठभेदः ) ॰प्रदेश॰ |
| ,, | ,, | अपि | तमपि |
| ,, | ८ | सिद्धान्तोऽयम् | (पाठभेदः) स्वसिद्धान्तो- |
| | | | ऽयम् |

## Appendix I

(to be supplied in the eighth line from the bottom on p. 6)

( परमानन्दमयपुरु ) षोत्तममृगुक्तरीत्या प्राप्नोतीत्यानन्दवल्ल्या रहस्यम् । अन्नमयादीनां ब्रह्मत्वं त्वग्रे प्रदर्शयिष्यमाणमित्यलम् । द्वितीयवर्णके त्वानन्दमयशब्दवाच्यः पर एव । कुतः । अभ्यासात् । तस्यैव शारीर आत्मा यः पूर्वस्येत्यन्नमयादिषु सर्वत्रैवात्मत्वेन पुनः पुनः कथनात् । ननु नायं पर एतस्याप्यग्रे भिन्नात्मनिरूपणादिति चेन्न । ईश्वरादन्यस्य सर्वात्मत्वानिरूपणात् । अत एवाग्रे सर्वान्तरत्वेन परपदार्थजिज्ञासानिवृत्त्या पुनः सर्वात्मतयान्यस्य परस्यानिरूपणाच्च । किंचानन्दमयस्यापरत्वे त्वेतदग्रे सर्वान्तिरत्वेन परतयान्यस्य कस्याप्यनिरूपणात्परपदार्थो निरूपितः स्यात् । तथा सति पुनर्जिज्ञासापत्तिश्च । नन्वत्राध्यात्मिकानामेव निरूपणं तेनैव च तच्छान्तेर्न तदुदयप्रसङ्ग इति चेन्मैवम् । आध्यात्मिकानामेव निरूपणे प्रमाणाभावात् । ( परमित्याप्नोतेः ···· )

## Appendix II

(to be added in the first line on p. 7)

( आनन्दवल्ल्यां त ) एव प्रकृत्यैव भृगुवल्ल्यां निरूपिताः, तेषां च स्वरूपं तपःसाधनेन ब्रह्मवेतिसाक्षात्कृतमिति नाब्रह्मत्वं तेषां शक्यनिरूपणम् । एतेन विकारित्वात्कोशशङ्कापि निरस्ता । अत्र प्रत्ययस्य विकारार्थताया आचार्यैरेव निराकरिष्यमाणत्वान्न निराकृतेति संक्षेपः ।

समर्थितमपि प्रमेयं कृत्वाचिन्तया पाणिनीयस्मृतिविरोधमाशङ्क्य परिहरन्ति ।

### विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १-१-१२ ॥

विकारवाची शब्दो मयट्प्रत्ययो यस्मिंस्तद्विकारशब्दमानन्दमयपदम् । भावप्रधानोऽयम् । तस्मादानन्दमयपदस्य विकारशब्दत्वात्, न, आनन्दमयपदवाच्यं ब्रह्म नेत्यर्थः । नेत्यादिः समाधिः । प्राचुर्यादिति । प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात् । प्रथमान्तमिदम् । अतो न पाणिनीयस्मृतिविरोधोऽपि । तत्प्रकृतवचने मयडिति मय ( द्विधानात् । )